- Title – भावप्रकाश।
- Accession No – Title –
- Accession No –
- Folio No/ Pages – 90/180
- Lines-
- Size
- Substance Paper –
- Script Devanagari
- Language – संस्कृत
- Period –
- Beginning –

- End –

- Colophon-
- Illustrations -
- Source -
- Subject - आयुर्वेद
- Revisor -
- Author - आचार्यभावमिश्र
- Remarks- अपूर्ण

शायावत् स्नायुमर्माणि॥ अर्द्धांगुलेनयोर्विद्धयोः सशल्योजीवेत्याकान्यति नशल्योवा उद्धृ
तशल्यस्तुम्रियेत॥ अतएवविशल्यं उद्धृतशल्यं हंतीति विशल्यघ्नमर्म स्थापनी एका॥ भ्रुवोः
मध्ये शिरामर्म इदमर्द्धांगुलं विशल्यघ्नं सप्तरात्रांतरे हन्तुः सद्यः प्राणहराणि हि कालांत
रप्राणहरं पक्षे मासे च मारकम् चरकः॥ सद्यः प्राणहरं यांते विद्धकाले न मारयेत् कालांतर
प्राणहरं मत्ते विद्धं वृद्धः स्वदं॥ अंते मर्मसमीपे मर्माण्यधिष्ठायति ये विकारा मूर्छन्ति काये वि
विधानराणाम् प्रायेणते कृच्छ्रतमा भवंति वैद्येनयत्नेरपि साध्यमानाः॥ अथ संधयः॥ तेहि
विधाश्चेष्टावंतः स्थिराश्च शाखासुहन्वोः कट्यां च चेष्टावंतो भवंति हि शेषास्तु संधयः सर्वे
स्थिरास्तत्तेरुदाहृताः कपिलादेहिनां देहे संधयो द्वे शते दश शाखासु तेऽष्टषष्टिश्च ६८ को
ष्ठेत्वेकोनषष्टिकाः ५९ ग्रीवायाऊर्द्धदेशेतु त्र्यशीतिस्ते ८३ प्रकीर्तिताः प्रथमं परिगणपने

तेषु शाखागताः ॥ एकैकस्यां तु पादांगुल्यां त्रयस्त्रयो द्वावंगुष्ठे ते चतुर्दश ॥ गुल्फजानुवंक्षणेष्वेकैक एवं सप्तदशैकस्मिन्सक्थिनि भवंति एतेनेतरसक्थि बाहू च व्याख्यातौ एवमष्टषष्टिः शाखासु ॥ अथ कोष्ठगतान्याह ॥ त्रयः कटीकपालेषु चतुर्विंशतिः पृष्ठवंशे तावंत एव पार्श्वयोरष्टावुरसि एवमेकोनषष्टिः कोष्ठे ॥ अथ ग्रीवोर्ध्वगतान्याह ॥ अष्टौ ग्रीवायां त्रयः कंठे ॥ नाडीषु हृदयक्लोमफुफ्फुसनिबद्धास्त्वष्टादश-द्वात्रिंशद्दंतमूलेष्वेकैकं कंठमणे नासायां चैकैकः द्वौ द्वौ वर्त्ममंडलगंडकर्णशंखेषु द्वौ हनुसंधौ द्वावुपरिष्टाद्भ्रुवोः शंखयोश्चोपरिष्टात्पंच शीर्षकपालेषु एको मूर्द्धनीति ॥ कंठमणेः घंटिकेति प्रसिद्धेः ॥ एते संधयोऽष्टविधा भवंति ते यथा कोरोदूखलसामुद्गाः प्रतरस्तूनसेविनी काकतुंडमंडलं चशंखावर्त्तोष्ट संधयः कोरो गर्तः ॥ कलिकेत्यन्ये ॥ उदूखलः प्रसिद्धः समुद्गः संपुटः समुद्ग एव सामुद्गः अत्र स्वार्थे अण् प्रतरंत्यनेनेति प्रतरो वेल्लकः तूनस्पतूनी रसपसेविनी सूतिस्तूनसेवनी काकतुंडं काकमुखम् मंडलं प्रसिद्धं ॥ शंखसावर्तः एते यथानामप्रकृतयः संधयो भवंतीत्यर्थः ॥

शंखावर्त्तः ४१

एषामंगुलिमणिबंधगुल्फजानुकूर्परेषु कोराः संधयः कक्षावंक्षणदंतेषु उदूखलाः अंसपीठ
गुदभगनितंबेषु सामुद्गाः ग्रीवापृष्ठवंशयोः प्रतराः शिरःकटीकपालेषु तुन्नसेवन्यः हन्वोरुभ
यतः काकतुंडाख्याः कंठहृदयक्लोमनाडीषु मंडलाख्याः श्रोत्रशृंगाटकेषु शंखावर्ताः अस्थ्नां
तु संधयो ह्येते केवलाः सम्प्रदाहृताः पेशीस्नायुशिराणां तु संधि संख्या न विद्यते॥ अथ शिराः सं
धिबंधनकारिण्यो दोषधातुवहाः शिराः नाभ्यां सर्वा निबद्धास्ताः प्रतन्वंति समंततः शरीरं सकलं
चैतत् शिराभिः पोष्यते सदा प्रणालीभिरिवारामः कुल्याभिः क्षेत्रधान्यवत् प्रणालीभिः कुल्या
भिरिति दृष्टांतद्वयं स्थलस्थस्य शिराभेदात् प्रसरणकुंच नादिक्रियाभिः सततं नो शिरा एवो तं x ३
पकुर्वंति ताः स्युः सप्तशतानि तु॥ यथा द्रुमदलेषु तातं दृश्यंते प्रतराः शिराः तथैव देहिनां देहे व
र्तंते सकलाः शिराः नाभिस्थाः प्राणिनां प्राणाः प्राणास्नाभिरुपाश्रिताः शिराभिरावृता नाभिश्चक्रनाभि भि x १

स दशपित्तवहाः दशश्लेष्मवहाः ४१

१८ रिवारकैः तायथा तासांखलुमूलंशिराश्चत्वारिंशत् तासांदशवातवहाः दशरक्तवहाः तासांख
लुवातवहानांवातस्थानगतानांपंचसप्ततिशतं १७५ भवति ॥ तावंत्यएवपित्तवहाःपित्तस्थान
गताःश्लेष्मवहाःश्लेष्मस्थानगताः रक्तवहाः यकृत्प्लीहगताः एवंशिराःसप्तशतानि भवंति त
त्रवातवहाः एकस्मिन्सक्थिनि भवंति पंचविंशतिः एतेनेतरसक्थिबाहूचव्याख्यातौ विशेष
चतु४ तः कोष्ठे त्रिंशत् तासांश्रोणिगुदमेढ्राश्रिताः अष्टौ द्वेद्वे पार्श्वयोः षट्पृष्ठे षट् उदरे दशव
क्षसि एकचत्वारिंशत्तु जत्रुणऊर्ध्वम् तासांचतुर्दशग्रीवायांचतस्रः कर्णयोः नवजिह्वा
यां षट्नासिकायां अष्टौनेत्रयोः एवं [illegible] वातवहानांसपंचसप्ततिशतंभवति एषविभा
गः पित्तवहानामपि विशेषस्तुपित्तवहानेत्रयोर्दश १० कर्णयोर्द्वे एवंरक्तवहाःश्लेष्मवहाश्च
षोडशग्रीवायां कर्णयोर्द्वे एवंशिराणांसप्तशतानिव्याख्यातानि क्रियाणामप्रती[illegible]रघा
तममोहंबुद्धिकर्मणां करोत्यन्यान्गुणांश्चापिस्वाःशिराःपवनश्चरन् क्रियाणांप्रसार । १८

तत्र तत्र

वैकल्यकरे तत्रस्पर्शाज्ञानमधः काये चेष्टोपघातश्च कक्षधरे वक्षः कक्षयोर्मध्ये द्वे स्ना
युमर्मणी एकांगुले वैकल्यकरे पक्षाघातः विधुरे कर्णपृष्ठतोऽधः संश्रिते किंचिन्निम्ना
कारे द्वे स्नायुमर्मणी अर्द्धांगुले वैकल्यकरे बाधिर्यम् कृकाटिके शिरोग्रीवयोरुभयतः
संधिसंधिमर्मणी अर्द्धांगुले वैकल्यकरे तत्र शिरःकंपः अंसे स्कंधे स्नायुमर्मणी अ
र्द्धांगुले वैकल्यकरे तत्र बाहुस्तंभः अंशफलके पृष्ठोपरि पृष्ठवंशमुभयतस्त्रिकसं
बंधे ग्रीवाया अंसद्वयस्य च संयोगो यत्र तत्त्रिकम् अस्थिमर्मणी अर्द्धांगुले वैकल्य
करे तत्र बाहोः स्वन्यता शोषश्च अपांगौ नेत्रयोरंतौ शिरामर्मणी अर्द्धांगुले वैकल्य
करे तत्रांध्यं दृष्ट्युपघातो वा नीले मन्ये च कंठनाडीमुभयतश्चतस्रो धमन्यो द्वे नी
ले द्वे मन्ये तत्र एका नीला एकस्मिन् पार्श्वे एका मन्या एका नीला एवं मन्या अपर

एका मन्या x२

6

३६

स्मिन्पार्श्वे० द्वे द्वे अपरस्मिन्पार्श्वे पि। शिरामर्माणि द्व्यंगुले वैकल्यकरे तत्र मूकताविकृ
तस्वरताऽरसग्राहिता च फले· घ्राणमार्गमुभयतः अभ्यंतरश्शिरामर्मणी अर्द्धांगुले
वैकल्यकरे· तत्र गंधाज्ञानम् आवर्तौ द्वौ भ्रुवौरुपरि निम्नयोः संधिमर्मणी अर्द्धांगु
ले वैकल्यकरे तत्रांध्यं दृष्ट्युपघातो वा गुल्फौ द्वौ मणिबंधौ द्वौ तथा कूर्चशिरांसि च रु
जाकराणि जानीयाद् दृष्ट्वैतानि बुद्धिमान् गुल्फौ घुटिके संधि मर्मणी द्व्यंगुलौ रु
जाकरौ· तत्र रुजा पादस्तंभः खंजता वा मणिबंधौ हस्तप्रकोष्ठसंधी संधिमर्मणी द्व्यंगु
लौ रुजाकरौ· तत्र हस्तयोः क्रियाराहित्यम् कूर्चशिरांसि गुल्फसंधेरधउभयतः ए
कस्मिन्पादे द्वे च द्वितीये एवं चत्वारि स्नायुमर्माणि एकांगुलानि रुजाकराणि तत्र रुजा
शोफश्च उत्क्षेपौ स्थापनी चैव विशल्यघ्नं त्रिकं मतम् उत्क्षेपौ शंखयोरुभयोरुपरिके

द्वे४२

३८

णां कुंचनादीनाम् अमोहं बुद्धिकर्मणाम् बुद्धींद्रियाणां मनसो बुद्धेश्च स्वे स्वे विषये ज्ञानं करो
तीत्यर्थः अन्यान् गुणान् रसादिधातु न द्वारा शरीरपोषणादीन् यदा तु कुपितो वायुः
स्वां शिराः प्रतिपद्यते तदास्य विविधा रोगा जायंते वातसंभवाः भ्राजिष्णुतामन्नरुचिम
ग्निदीप्तिमरोगताम् करोत्यन्यान् गुणांश्चापि पित्तमात्मशिराश्चरन् अरोगतां चेति करो
गात्युत्पत्तिम् अन्यान् गुणान् मेधाबुद्धिदर्शनशत्यादीन् यदा तु कुपितं पित्तं सेवते स्ववहाः
शिराः तदास्य विविधा रोगा जायंते पित्तसंभवाः स्नेहमंगेषु संधीनां स्थैर्यं बलमरोगताम्
करोत्यन्यान् गुणांश्चापि बलासः स्वाः शिराश्चरन् अरोगतास्ते समरोगादुत्पत्तिं अन्यान् गुणा
न् बलपुष्ट्यादीन् यदा प्रकुपितः श्लेष्मा स्वाः शिराः प्रतिपद्यते तदास्य विविधा रोगा जायंते श्ले
ष्मसंभवाः धातूनां पूरणं वर्णं स्पर्शज्ञानमसंशयम् स्वाः शिराः संचरन् रक्तं कुर्याच्चान्यान् गुणान
पि अन्यान् गुणान् बलपुष्ट्यादीन् यदा तु कुपितं रक्तं सेवते स्ववहाः शिराः तदास्य विविधा रोगा

तां

क्रमात्

जायंते रक्तसंभवाः तत्रारुणाः रक्तवहाः पूर्यंते वा तु नाशिराः पित्तादुष्णाश्च नीलाश्च शीता गौ
र्यः स्थिराः कफात् असृग्वहास्तु रक्ताः स्युः नात्युष्णशीतलाः अथ स्नायवः तत्र स्नायोः स्व
रूपमाह मेदसः स्नेहमादाय सिरा स्नायुत्वमाप्नुयात् शिराणां हि मृदुः पाकः स्नायूनां तु त
तः खरः स्नायवो बंधनानि स्युर्देहे मांसास्थिमेदसाम् संधीनामपि यत्तास्तु शिराभ्यः सुदृढाः
स्मृताः नौर्यथा फलकास्तीर्णा बंधनैर्बहुभिर्युता नियुक्तागाधसलिले भवेद्भारसहा भृशं
एवमेव शरीरेऽस्मिन् यावंतः संधयः स्मृताः स्नायुभिर्बहुभिर्बद्धास्तेन भारसहा नराः फ
लकैः काष्टपट्टैः आस्तीर्णा व्यामा, शतानि नव जायंते शरीरे स्नायवो नृणां तासां विवरण
क्रमः शिष्याः शृणुत यत्नतः शाखासु षट्शतानि स्युः कोष्ठे त्रिंशच्छतद्वयं ग्रीवाया ऊर्ध्वदे
शे तु स्नायूनां सप्ततिः स्मृताः तत्र शाखागताः प्राह ॥ एकैकस्यां पादांगुल्यां षट् षट् तास्त्रिं
शत् तावंत्य एव तलकूर्चगुल्फेषु तावंत्य एव जंघायाम् दश जानुनि चत्वारिंशदूरौ दश वंक्षणे

एवं सार्द्धं शतमेकस्मिन् सक्थ्नि भवंति एतेनेतरसक्थि वाहू च व्याख्यातौ अथ कोष्ठगता आ-
ह षष्टिः कट्याम् तावंत्यः पार्श्वयोः अशीतिं पृष्ठे त्रिंशदुरसि अथ ग्रीवोर्द्धगतान्याह षट्त्रिं-
शत् ग्रीवायाम् चतुस्त्रिंशन्मूर्द्ध्नि॥ एवं स्नायूनां नव शतानि भवंति अथ धमन्यः धमन्यो
नाभितो जाताश्चतुर्विंशतिसंख्यया दशोर्द्ध्वगा दशाधोगाः शेषास्तिर्यक् चराः स्मृताः तत्रो-
रस× र्द्ध्वगाः शब्दस्पर्शरूपगंधप्रश्वासोछ्वासजृंभितक्षुतहसितकथितरुदितगीतादिविशेषान्
अभिवहंत्यः शरीरं धारयंति प्रश्वासः अंतः प्रविशन्वायुः उच्छ्वासः ऊर्द्ध्वगच्छद्वायुः तास्तु
हृदयंगतास्त्रिधा जायंते तास्त्रिंशत् तासां मध्ये द्वे द्वे वातपित्तकफशोणितरसान्वहंतः ता
दश अष्टाभिः शब्दरूपरसगंधान्गृह्णाति पुरुषः द्वाभ्यां भाषते द्वाभ्यां घोषं करोति द्वाभ्यां
स्वपिति द्वाभ्यां जागर्ति द्वे चा वाहिन्यौ द्वे स्तन्यं स्त्रिया वहतः एतास्त्रिंशत् एताभिरुदर-
पार्श्वपृष्ठोरःस्कंधग्रीवाशिरोबाहवो धार्यंते च अधोगमास्तु वातमूत्रपुरीषशुक्रार्त्तवादीन्

श्रु×२ त्यंते×२

धोवहंति तास्तु पित्ताशयंगतास्त्रिधाजायंते तास्त्रिंशत् तासांमध्येद्वेद्वेवातपित्तकफशोणितर
सान्वहतः तादश द्वेअन्नवहे गंभ्राश्रिते द्वे द्वेतोयवहे द्वेवस्तिंगते मूत्रवहे द्वेशुक्रंप्रादुर्भाव
यतः द्वेतद्विसर्गायते एवंनारीणामार्तवंप्रादुर्भावयतो विसर्जनश्च द्वेस्थूलांत्रंप्रतिबद्धे द्वेपु
रीषंविसृजतः अष्टावन्यास्तिर्यग्गाताः स्वेदमपसर्पयंति एताश्चत्रिंशत् एताभिरधोना
भेःपक्वाशयकटीमूत्रपुरीषवस्तिगुदमेढ्रसक्थीनि धार्यंतेचाल्यंतेच तिर्यग्गामिनांतुच
तसृणामेकैकाशासहस्रधाचोत्तरोत्तरं विभज्यंते तास्त्वसंख्येयास्ताभिरिदंशरीरंगवाक्षि
तंनिवद्धमाततंच गवाक्षितंगवाक्षाकारंचनिकरयुक्तं कृतमित्यर्थः तासांमुखानिरोमकू
पलग्नानिर्यैर्मुखैःस्वेदंस्रवंति रसंचाभिसंतर्पयंत्यंतर्बहिश्च तैरेवाभ्यंगपरिषेकाव
गाहनालेपनवीर्याणित्वग्विपक्वान्यंतः प्रविशयंति तैरेवस्पर्शंशुभमशुभंवागृह्णंति॥

शतधार

यथास्वभावतःस्वानिमरणकालेषुविशी[र्णे]षुच धर्म णीनां तथाथानिरसौजोभिरभिनिर्वर्त्तत् पंचा

भिभूतास्त्वयं पंचकृत्वःपंचेंद्रियंपंचसमुभावयंति पंचेंद्रियंपंचसमुभावयित्वा पंचत्वमायांति

विनाशकाले अप्यायमर्थः धर्मन्याःकथंभूताःपंचभ्यआकाशादि[?] महाभूतेभ्यः अभिस

मंनात् भूताः उभयात्मकं मनश्चेश्वयस्यतद्भूत्वायाताःपंचेंद्रियंपंचेंद्रियाणिश्रोत्रादिबुद्धीद्रि॰

याणि॰तदुपलक्षितानि हस्तादिकर्मेंद्रियाणि॰पंचेंद्रियंजीवात्मानंपंचसमु इंद्रियाधिष्ठाने

षुश्रोत्रादिषु॰पंचकृत्वःपंचवारानुपर्यायेणत्वेकदेवभावयंति प्रापयंति॰पंचेंद्रियंपंचाना

मिंद्रियाणांसमाहारःपंचेंद्रियंश्रोत्रादि तदुपलक्षितकर्मेंद्रियंमनश्च॥पंचसमुशब्दादि॰

ज्ञानेंद्रियविषयेषुतदुपलक्षितेषुहस्तादिषुकर्मेंद्रियविषयेषु मंतव्येमनोविषयेचभाव

प्रा यित्वांप्रसंयोज्येतियावत् विनाशकालेपंचत्वंआकाशादिभावंआयांति प्राप्नुवंतीत्यर्थः

अध्यकण्डरां॥महतःस्नायवःप्रोक्ताःकण्डरास्तास्तुषोडश प्रसारणाकुंचनयोर्दृष्टंतासांप्र

४१

12

यौजनम् चतस्रो हस्तयोस्तासां तावंत्यः पादयोः स्मृताः ग्रीवायामपि तावंत्यस्तावंत्यः पृष्ठसं-
गताः तत्र पादहस्तगतानां कंडराणां नखाः प्ररोहाः ग्रीवानिबंधिनीनाम धोभागगतानां
प्ररोहिमेढ्रः पृष्ठनिबंधानां प्ररोहान्नितंवम्हौरुवदोत्तसनर्पिडः॥ अथ रंध्राणि नेत्रश्र-
वणनासानां द्वे द्वे रंध्रे प्रकीर्तिते मुखमेहनपायूनामेकैकं रंध्रमुच्यते दशमं मस्तके प्रोक्तं
रंध्राणीति नृणां विदुः स्त्रीणामन्यानि च त्रीणि स्तनयोर्गर्भवर्त्मनि॥ अथ स्रोतांसि॥ मनःप्रा-
णान्नपानीयदोषधातूपधातवः धातूनां च मला मूत्रं मलमित्यादयस्तनोः संचरंति हि
येभ्यो मार्गैस्तानि स्रोतांसि संजगुः बहूनि तान्यसंख्यानि शक्यंते नैव भाषितुम्॥ अथ जाला-
नि॥ निरंतरं रंध्रनिकरकलितानि समूहितानि वजालानीव जालानि जालानि तु शिरा-
स्नायुमांसास्थामुद्भवंति हि॥ तानि च चत्वारि चत्वारि सर्वाण्येव तु षोडश तानि मणिबंध-
गुल्फसंश्रितानि परस्परनिबद्धानि परस्परं समाश्लिष्टानि परस्परगवाक्षितानि चेति॥

४१

येर्गवाक्षितमिदं शरीरं ॥ अयमर्थः॥ एकस्मिन्मणिबंधे एकं जालं शिरायाः॥ अपरं
स्नायोस्तृतीयं मांसस्य चतुर्थमस्थ्नः एवं चत्वारि जालानि॥ एतेनेतरमणिबंधो गुल्फौ
च व्याख्यातौ गवाक्षितं विरच्छितनिरंतरजालाकारं रंध्रनिकरवलितमित्यर्थः॥ अथ
कूर्चाः कूर्चाः [illegible] स्मृहस्तयोर्द्वौ तु तावंतौ पादयोरपि॥ ग्रीवायामेक एक [illegible]मेढ्रे स
वैपि षट् स्मृताः कूर्चा अपि शिरास्नायुमांसास्थिप्रभवाः स्मृताः॥ अथ रज्जवः पृष्ठवंशा
स्योभयत्र महत्यो मांसरज्जवः चतस्रो मांसपेशीनां बंधनं तत्प्रयोजनं॥ अथ सेवन्यः से
वन्यः सप्त तासां तु भवेयुः पंच मस्तके॥ एका शेफसि जिह्वायामेका विध्येन्न ताः क्वचित्॥
॥ अथ संघाताः चतुर्दश संख्याः संघाताः तेषां त्रयो गुल्फजानुवंक्षणेषु एतेनेतरसक्थि
बाहू च व्याख्यातौ त्रिकशिरसोरेकैकः॥ अत्र त्रिकपदेन बाहुग्रीवा[illegible]स्थिसंघात उच्य
ते॥ अथ सीमंताः चतुर्दशैव सीमंताः कथिता मुनिपुंगवैः संघाताः दीविता येस्तु॥

13

रिक X ३

भ्रामकेनापि ज्ञेनावभासमानात् पहिला हेनविज्ञा दिनस्य ब्रीहेर्विंश

८४२ भागेषु ग्र द्वादश ४२

14

सीमंतास्ते प्रकीर्तिताः येंग्रस्थिभिः ॥ प्रथमा त्वचः क्षीरस्य पच्यमानस्य यथा संतानिका
भवेत् पच्यमानस्य शुक्रस्य जे श्वत था त्वचः पूर्वावभासिनी तासां सिध्मस्थानं
च सा मता अथावभासिनी ॥ भागाः प्रमाणं तस्याः ब्रीहिरष्टपदः सा सिध्मपद्मकंट
कयोः रधिष्ठानम् द्वितीया लोहिता ज्ञेया तिलकालकजन्मभूः सा यवषोडशभा
गप्रमाणा ॥ तिलकालकन्यच्छव्यंगानामधिष्ठानम् तृतीया तु भवेत् श्वेता स्था
ने चर्मदलसंसा सा यवद्वादशभागप्रमाणा ॥ चर्मदला जगलिका मसकानाम
धिष्ठानम् ॥ ताम्रा चतुर्थी विज्ञेया किलासश्वित्रभूमिका ॥ यवाष्टभागप्रमाणा
पंचमी वेदिनी नाम्ना पंचभागप्रमाणिका विसर्पकुष्ठाधिष्ठानं सेया षष्ठी तु लो
हिता ॥ ब्रीहिमात्रप्रमाणा सा ग्रंथिगंडाऽपचीस्थितिः ब्रीहिप्रमाणा ग्रंथ्यपचीग

गं५

लगंडमालार्बुदश्लीपदानामधिष्ठानम् स्थूलात्वक्सप्तमीख्याता विद्रध्यादिस्थित्ति
स्थला॥ साव्रीहिद्वयप्रमाणा अंगुष्ठोदरतुल्यम् यत्नउक्तम्॥ उदरेंगुष्ठोदरप्रमाण
मवगाढं विध्येदिति एतत्प्रमाणं मांसलेषु स्थूलेषु बोधव्यम्॥ ननु ललाटसूक्ष्मा
ग्रत्यादिषु अथ लोमानि लोमकूपाश्च॥ अस्थिमलानि लोमानि अंसंख्यानि भवंति
हि॥ संतियावंति लोमानि तावंतो लोमकूपकाः अंगप्रत्यंगनिर्वृत्तिः स्वभावादेव जा
यते सन्निवेशश्च गात्राणां नात्रास्ति कारणांतरं॥ निर्वृत्तिः सिद्धिः स्वभावादे [illegible] स्वरा
न्तः सन्निवेशो रचनाविशेषः अंगप्रत्यंगनिर्वृत्तौ ये भवंत्यगुणागुणाः तेते गर्भस्य वित्ते
याधर्माधर्मनिमित्तजाः दंतानां पतनं जन्मपुनःपाते [illegible] संभवाः तलेष्वतद्भवो लोम्नां
मेतत्सर्वं स्वभावतः गर्भेमासिमासि चद्भवति न दाहा॥ गर्भाशये निपतितं तयाहृकूश्चकं

अथ ४ व४२

अतएवोक्तं शार्ङ्गधरेण॥ स्थूलादि व्रीहिमात्रं
येति सप्तापि त्वचः समुदिता विंशतितमभागा
न्यष्टद्व्यवप्रमाणा २॥

तथार्तवम् तादृगेवद्रवीभूतं प्रथमेमासितिष्ठति महत्तपित्तकफैस्तस्यैः पच्यमानो द्वि
तीयके कललस्य महाभूतसमुदायो घनो भवेत् ॥ अत्र महत्कफयोरपि पाकहेतुत्वं तयो
पू॰ रप्यूष्मणोऽधिकरणत्वात् यतउक्तं चरके ॥ भौमाप्याग्नेयवायव्याः पंचोष्माणः सनाभ
साः इति तृतीयेमासि शिरसो हस्तयोः पादयोस्तथा पिंडकाख्यं च सिध्यंति सूक्ष्माः प्रवय
वास्तनोः सर्वाण्यंगान्युपांगानि चतुर्थे स्युः स्फुटानि हि हृदयव्यक्तिभावेन व्यज्यते चेत
नापि च ॥ तस्माच्चतुर्थे गर्भस्तु न्याय्यं वस्तु निवांछति ॥ तत्र द्विहृदयाय त्स्यान्नारीदोहदे
नीमता दोहदावस्तयाकुड्वं कुणिं षंढं च वामनम् विकृताक्षमनन्धं वा पुत्रं नारी प्रसू
यते यतः स्त्री दोहदं प्राप्य वीर्यवंतं चिरायुषम् पुत्रं प्रसूयते तस्मात्स्यैवांछितमर्पये
त् इंद्रियार्थान्सो यान्यान्भोक्तुमिच्छति गर्भिणी गर्भबाधाभयात्तांस्तान्भिषगाहृत्य

दापयेत् भोक्तुमुपभोक्तुमित्यर्थः साप्राप्तदोहदा पुत्रं जनयेत गुणान्वितम् अलब्धदोहदा गर्भे
लभेतात्मनि वा भयं येषु येष्विन्द्रियार्थेषु दोहदे सा विमानिता प्रसूयते सुतं सार्त्तिं तस्मिंस्त
स्मिंस्तदिन्द्रिये सार्त्तिं सव्ययं ॥ दोहदविशेषफलमाह राजसंदर्शने यस्या दोहदं जायते स्त्रियः
अर्थवन्तं महाभागं कुमारं सा प्रसूयते ॥ [illegible] दुकूलपट्टकौशेयभूषणादिषु दोह
दात् ॥ अलंकारैषिणं पुत्रं ललितं सा प्रसूयते आश्रमे संयतात्मानं धर्मशीलं प्रसूयते
देवताप्रतिमायां तु प्रसूते पार्षदोपमं आश्रमे तपस्विनामाश्रये दोहदात् पार्षदोपमं
प्रमयोपमे [illegible]र्शने व्यालजातीनां हिंसाशीलं प्रसूयते रकाद्तं लोमशास्रू रंमहिषामिष
दोहदात् ॥ वराहमांसे स्वप्नालुं शूरं च जनयेत्सुतं मृगमांसे तु जंघालं विक्रान्तं वनचा
रिणम् ॥ अतोऽन्यत्केऽपि नारी दोहदं विदधाति हि प्राणिशरीराचारशीलैः सा समानं जन

षिष्यति॥पंचमेमासेमनसंप्रवर्द्धतेबुद्धिःक्रमात्प्रवर्त्तते सर्वांग्येवगात्रेषु अंगानिम्स्फुरंति च तानि
सप्तमे॥ओजोष्टमेसंचरतिमाताच पुनः कुमात् तेन तौम्लानमुदितौ ततोजातोन
जीवति॥नजीवत्यष्टमेजातस्तत्रोजोनस्थिरं यतः नयोनैऋतभागत्वाद्दापयेत्तद्बलिंत
तः नैऋतायभागस्थबालेभ्यः दद्यात्ततः यतउक्तंकुमारतंत्रे॥अष्टमेमासिनैऋताय
मांसोदनंबलिंदापयेदिति नवमेदशमेमासिनारीबालंप्रसूयते॥एकादशेद्वादशेवा
ततोन्यत्रविकारतः गर्भस्यदेहे प्रथमंभवतिनवात्॥शिरोभवति चांगस्यपूर्वमित्या
हशौनकः शिरस्येवोपजायन्ते प्रधानानीन्द्रियाणि हृदयं जायते पूर्वं कृतवीर्यो वदन्निति
बुद्धेश्च मनसश्चापि यस्तत्स्थानमीरितम् पाराशर्यइति प्राक् पूर्वं नाभिसमुद्भवः प्राणो
यत्रस्थितोदेहं वर्द्धयत्यसौ ततः पाणिपादं भवेत्सर्वं मार्कण्डेयमते मतं॥देहिनःस

न४२ पाणि४३

शः

कलाश्लेष्माः पाणिपादाश्रयायतः प्रथमं जायते कोष्ठं ततः सर्वांगसंभवः एतत्तु कथयामा
स गौतमाय मुनिपुंगवः सर्वाण्यंगान्युपांगानि युगपत्संभवंतीति हि॥ सूक्ष्मत्वान्नोपलभ्यंते
मतं धन्वंतरेरिदं॥ आम्रस्याथ फले भवंति युगपन्मांसास्थिमज्जादयो लक्ष्यंते न पृथक्पृ
थक् त्वथ पाकोपलक्षास्त एव स्फुटाः एवं गर्भसमुद्भवे त्ववयवाः सर्वे भवंत्येकदा लक्ष्याः सूक्ष्म
तया न ते प्रकटतामायांति वृद्धिं गताः मज्जादय इत्यादिशब्देन त्वक्केशरोमांकुरवृत्तानि
गृह्यंते॥ अथ शरीरे पितृजमातृजरसजात्मजभागा उच्यंते॥ तत्र केशाः श्मश्रु च लोमानि
स्ना नखा दंताः शिरास्तथा धमन्यः स्नायवः शुक्रमेतानि पितृजानि हि॥ मांसासृग्मज्जमेदांसि
यकृत्प्लीहांत्रनाभयः हृदयं च गुदं चापि भवंत्येतानि मातृतः शरीरोपचयो वर्णो बलं दे
हस्थितिस्तथा रसादेतानि जायंते भिषजो मुनयो जगुः ज्ञानं विज्ञानमायुश्च सुखदुःखा
दिकं तथा इंद्रियाणि च सर्वाणि भवंत्येतानि चात्मनः दुःखादिकमित्यादिशब्देन नाना

योनिजन्मादिकमुच्यते॥ आत्मनः। आत्मसन्निकर्षात् न त्वात्मनो जायंते। आत्मनो निर्वि
त्वा४ कार॑त्वात्॥ प्रकृतिभावानुपपत्तेः। अथ गर्भस्य किं किं वैशिष्ट्योपकारकं तत्तदाह॥ अग्नीषो।
मौ मरुद्वायुर्नभः सत्वं रजस्तमः पंचेंद्रियाणि भूतात्मा गर्भं संजीवयंति हि॥ अग्निरत्र पा
चकभ्राजकालोचकरंजकसाधकानां तथा पांचभौतिकानां तथा सप्तधातुगतानाम
चा४ ग्नीनां शक्तिरूपतयावस्थितो वाऽधिदेवत्वं प्राप्तो वोद्धव्यः स च पाकादिकर्मणा जीवयति
सोमश्चापंचात्मकः श्लेष्मरसशुक्रादीनां तोयात्मकानां भवानां रसेंद्रियस्य च शक्तिरूपत नें
यावस्थितो मनसश्चाधिदेवत्वं प्राप्तो वोद्धव्यः स च सौम्यधातोरोजःप्रभृतेः पोषणेन पव
नपाचकसंशुष्कभागस्याप्यायनाविधानेन जीवयतीति शेषः मरुच्च जलेन क्लिन्नस्यापि
कठिनविधानेन वायुर्दोषधातुमलानां गोमलादीनां संचारणेनोच्छ्वासनिःश्वासाभ्यां म
नोरूपतया परिणतजीवात्मनः प्रभीरांतर्गुहणमोदहेतुरिति तदपि जीवयति॥ पंचें
ण

द्रियाणि श्रोत्रत्वक् नेत्रजिह्वाघ्राणानि शब्दादि ग्रहणकर्मणा भूतात्मा कर्मपुरुषः स
चाशेषस्यैव शेषराशेश्चैतन्यहेतुरिति जीवयति॥ अथ परं गर्भस्य जीवनोपायमाह॥ ग
र्भस्य नाभिनाडीतु नाडीरसवहा स्त्रिया॥ संलग्ना स्तेन गर्भस्य वृद्धिर्भवति नित्यशः॥ निः
श्वासोच्छ्वाससंक्षोभस्वप्नानां सोधिगच्छति मातुर्निश्वसितोच्छ्वाससंक्षोभः स्वप्नसंभ
वात् संक्षोभः संचलनम् मातानिःश्वासादिकाः या याश्चेष्टाः करोति तास्ता गर्भोपिक
रोतीत्यर्थः गर्भवृद्धिरूपायमाह गर्भस्यनाभिमध्येतु ज्योतिस्थानं ध्रुवं स्मृतं॥ तदाधम
तिवातश्च देहस्तेनास्य वर्द्धते ऊष्मणा सहितश्चापि दारयत्यस्य मारुतः ऊर्द्धं तिर्यगध
स्तात्स्रोतांसि तु यथा तथा यथा दारयति विस्तारयति तथा देहो वर्द्धत इति पूर्वेणा
न्वयः दृष्टिरोमकूपाणामवृद्धिमाह दृष्टिश्चरोमकूपाश्च न वर्द्धन्ते कदाचन ध्रुवाण्ये
तानि मर्त्यानामिति धन्वंतरेर्मतम् नखकेशानां वृद्धिं सदेमाह॥ शरीरे क्षीयमाणेपि

वर्द्धते ह्यविमोसदा स्वभावं प्रकृतिं कृत्वा नखकेशाविति स्थितिं॥ प्रकृतिं कृत्वाकारणं
कृत्वा स्थितिः सर्वदा॥ अचेतनान्यंगान्याह॥ चेतनानामधिष्ठानं मनो देहश्च सेंद्रि
यः केशलोमनखाग्र्यान्तमलद्रव्यगुणैर्विना गर्भस्य वात विण्मूत्रोत्सर्गाकरणे कारण
माह॥ वातात्पत्वाद्योगाच्च वायोः पक्वाशयस्य च वातमूत्रपुरीषाणि गर्भस्योनवि
सृजति॥ अयोगात ईषद्योगात्॥ गर्भारोदनेकारणमाह॥ जरायुणा मुखे छन्ने
कंठे च कफवेष्टिते॥ वायोर्मार्गनिरोधाच्च न गर्भस्थः प्ररोदिति॥ अथ गर्भवती कृत्या
कृत्यानि॥ गर्भिणी प्रथमादह्नः प्रहृष्टा भूषिता शुचिः भवेच्छुक्लाम्बरा देवगुरुविप्रार्च
नेरता भोज्यं तु मधुरप्रायं स्निग्धं हृद्यं द्रवं लघु संस्कृतं दीपनीयं तु नित्यमेवोपयो
जयेत्॥ गर्भिणी न तु कुर्वीत व्यायाममपतर्पणम् व्यवायं च न सेवेत न कुर्यादतित
र्पणम् रात्रौ जागरणं शोकं यानस्यारोहणं तथा रक्तमोक्षं वेगरोधं न कुर्यादुत्कटा

सनम् दोषाभिघाते गर्भिण्या यो यो भागः प्रपीड्यते स स भागः शिशोस्तस्य गर्भस्थस्य प्रपी
ड्यते मलिनो विकृताकारो हीनाङ्गो न स्यः शिशोस्त्रियम् न जिघ्रेदपि दुर्गन्धं न पश्येन्नयनाप्रि
यम्॥ वचांसि नापि शृणुयात्कर्णयोरप्रियानि च॥ नान्नं पर्युषितं शुष्कं भुंजीत न क्वथितं न
च चैत्यश्मसानवृक्षांश्च भावांश्चाप्ययशस्करान् बहिर्निष्क्रमणं क्रोधं शून्यागारं च वर्जयेत्
नोच्चैर्ब्रूयान्न तत्कुर्याद्येन गर्भो विनश्यति तैलाभ्यंगोद्वर्तनं च नात्यर्थं कारयेदिति नामृद्वा
स्तरणं कुर्यान्नात्युच्चशयनासनम् एतान् सुनियमान्सर्वान् यत्नात्कुर्वीत गुर्विणी॥ अथ
प्रसवमासानाह॥ नवमे दशमे मासि नारी गर्भं प्रसूयते एकादशे द्वादशे वा ततोऽन्यत्र विका
रतः॥ अथ सूतिकागृहाकृतिः॥ अष्टहस्तायतां चारु चतुर्हस्तविशालकम् प्राचीद्वारमुद
ग्द्वारं विदध्यात्सूतिगृहे॥ अथासन्नप्रसवायाः लक्षणम् जाते हि शिथिले कुक्षौ मुक्ते हृदय
बंधने॥ सशूले जघने नारी विज्ञेया प्रसवोन्मुका॥ आसन्नप्रसवायास्तु कटीपृष्ठं तु सर्व

का १४२

यम्॥ भवेन्मूढः प्रवृत्तिश्च मूत्रस्य च मलस्य च॥ अथासन्नप्रसवाया उपचारः॥ तैलेनाभ्यक्त
गात्रां तां संस्नातामुष्णवारिणा। यवागूं पाययेत्कोष्णां मात्रया घृतसंयुताम्॥ कृतोपधा
ने मृदुनि विस्तीर्णे शयने शनैः॥ आभुग्नसक्थीत्ताना नारी तिष्ठेद्यत्नान्विता॥ आभुग्न
सक्थी संकोचितोरुः॥ अथ प्रजनयित्रीराह॥ चतस्रोऽथ कनीयांश्च साधने कुशलाहिताः
वृद्धाः परिचरेयुस्तां सम्यक्छिन्ननखाः स्त्रियः॥ अथ प्रजनयित्रीकृत्यम्॥ अपत्यमार्गं
तैलेन समभ्यज्य समंततः। एकानुतासु सुभगे प्रवाहस्वेति तां वदेत्॥ अव्यथामाप्रवाहि
णः प्रवाहे या व्यथा यदि। प्रवाहिथाः शनैः पूर्वं प्रगाढं च ततः परम्॥ ततो गाढतरं गर्भे
योनिद्वारमुपागते॥ अपरासहितो गर्भो यावत्पतति भूतले॥ व्यथारहितायाः प्रवाह
णाद्दोषमाह॥ मूकं वा बधिरं कुब्जं श्वासकासक्षयान्वितम्। सुते स्त्री जननं बालम
कालेतु प्रवाहणात्॥ इति श्रीमिश्रलटकनतनय श्रीमन्मिश्रभावविरचिते भावप्र

चौ ४२

प्रकाशे गर्भप्रकरणं द्वितीयम् ॥ २ ॥ अथ बालस्य जन्मोत्तर विधिः अथ बाले समु
त्पन्ने विदधीत विधिं तथा यथैव कुलवृद्धस्त्रीव्यवहारपरंपरा अथ प्रसूता नि
यमानाह ॥ प्रसूता हितमाहारं विहारं च समाचरेत् व्यायामं मैथुनं क्रोधं शीत
सेवां विवर्जयेत् मिथ्याचारात्सूतिकाया यो व्याधिरुपजायते स कृच्छ्रसाध्यो ऽसा
ध्यो वा भवेत्तत्पथ्यमाचरेत् अथ प्रसूता यानियमनावधिमाह ॥ सर्वतः प
रिशुद्धा स्यात्स्निग्धपथ्याल्पभोजना स्वेदाभ्यंगपरा नित्यं भवेन्मासमतंद्रिता ॥
सर्वतः परिशुद्धा सुतावशिष्टदुष्टरुधिरा अतंद्रिता सावधाना प्रसूता सार्द्ध
मासांते दृष्टे वा पुनरार्तवे ॥ सूतिकानाम हीना स्यादिति धन्वन्तरेर्मतम् ॥ उपद्रवो
विशुद्धां च विज्ञाय वरवर्णिनी ऊर्द्ध्वं चतुर्भ्यो मासेभ्यो नियमं परिहारयेत् अथ स्त
न्यस्वरूपमाह ॥ रसप्रसादो मधुरः पक्वाहारनिमित्तजः कृत्स्नाद्देहात्स्तनौ प्राप्तः स्त

25

न्यमित्यभिधीयते॥ रसप्रसादः रसस्यसारः स्तन्यस्यप्रवृत्तिमाह॥ स्तन्यं त्रिरात्रात्
स्त्रीणां वा चतूरात्रादनंतरम् प्रवर्तयेति प्रवृत्ताधमन्योहृदयेस्थिताः॥ अथस्तन्यस्य
प्रवृत्तिमाह॥ पयः पुत्रस्य संस्पर्शात् दर्शनात्स्मरणादपि॥ ग्रहणादप्युरोजस्य शुक्र
वत्तत्प्रवर्तते॥ स्नेहो निरंतरस्तस्य प्रस्रवे हेतुरुच्यते॥ अथस्तन्यस्याल्पताहेतुमाह॥
त प्रवासाल्लोभयाच्छोकात्क्रोधादप्यपतर्पणात्॥ स्त्रीणां स्तन्यं भवेत्स्वल्पं गर्भांतरवि
धारणात्॥ अथस्तन्यस्य वृद्धिहेतुमाह॥ शालिषष्टिकगोधूममांसं तुद्र पानपि॥ ऊ
कालशाकमलाबुं च नारिकेरं कसेरुकं शृंगाटकं च शीचापि विदारीकंदमेव च ल
सन्दुग्धवत्सेस्त्रीसेवेन सुमनाभवेत्॥ कलमस्य तंडुलानां कल्कं यातीरपेषि
तं पिबति॥ सा भवति प्रचुरतरक्षीरभरेणैव तुंगकुचयुगला॥ कलमो धान्यवि
शेषस्तस्य लक्षणमाह॥ कलमः कलविख्यातो जायते सुवृहद्गृहे काश्मीरदेश

27

स्य

एवोक्तो महातंडुलसंज्ञकः॥ विदारीकंदस्वरसे पिवेत्स्तन्यवृद्धये तच्चूर्णं तस्य रसेन

युंपिवेद्धात्रीरसैर्युतम्॥ अथस्तन्यस्य दुष्टहेतुमाह॥ धात्र्यागुरुभिराहारैर्विषमैर्दो

षलैस्तथा देहेदोषाः प्रकुप्यंति ततः स्तन्यं प्रदुष्यति॥ मिथ्याहारविहारेणा दुष्ट

वातादयः स्त्रियाः दूषयंति पयस्तेन शारीरेव्याधयः शिशोः॥ अथदुष्टस्य स्तन्यस्य ल

क्षणमाह॥ कषायं सलिलप्लावि स्तन्यं मारुतदूषितं पित्तादम्लं चकटुकं राज्योंभसि

का: तुपी[illegible]तं[illegible]कफदुष्टं यत्तु तोये निमज्जति च पिच्छिलम्॥ द्वंद्वजं तु द्विलिंगस्यात्लिंगंसा

त्रि

न्निपातिके॥ अथदुष्टस्तन्यस्य शोधनविधिमाह॥ धात्री क्षीरविशुद्ध्यर्थं मुद्गयूषरसा

शिनी[illegible]गीदारु वचाः पिष्टाः पिवेत्सातिविषास्तथा पाठामूर्वा[illegible]निवदारुशु

ंठीकलिंगकैः सारिवामत्स्यपित्ताख्यैः क्वाथः स्तन्यविशोधनः मत्स्यपित्ताकटुकी॥

पटोलनिंवासनदारुपाठामूर्वागुडूचीकटुरोहिणीच॥ समागरामृक्कुपितांश्चतो

येधात्रीपिबेत्स्तन्य विशुद्धेर्हेतोः अथशुद्धस्तन्यस्यलक्षणमाह॥ नीरेस्तं यदेकी
स्यादविवर्णमतंतुमत्॥ पांडुरंतनुशीतंचतद्दुग्धंशुद्धमादिशेत्॥ अथधात्रीलक्षण
माह॥ पित्रातुयदिबालस्यविदध्यादुपमातरम्॥ सुविचार्यगुणान्दोषान्धात्रींकुर्या
त्तदेदृशीम्॥ सवर्णामध्यवयसासधीलामुदिता सदाशुद्धदुग्धावहुक्षीरासव
त्सामतिवत्सला॥ स्वाधीनामल्पसंतुष्टाकुलीनासज्जनात्मजा॥ केनचेनपरित्यक्तानिज
पुत्रहृष्टशिशो॥ अथनिषिद्धधात्रीमाह॥ शोकाकुलात्तुधार्ताचश्रांताव्याधिमतीस
दा अत्युच्चानिम्नरानीचास्थूलातीवमशंकृशा॥ गर्भिणीज्वरिणीचापिलंबोन्नतपयो
धरा॥ अजीर्णभोजिनीचापितथापथ्यविवर्जिता आसक्ता क्षुद्रकार्येषुदुःखार्ताचं
चलापिच॥ एतासांस्तन्यपानेनशिशुर्भवतिसामयः अथबालस्यस्तन्यपानविधिः त
त्रमाताप्रशस्तेऽगीचासुवस्त्राप्रागुदङ्मुखी उपवेश्यासनेसम्यक्दद्यात्दक्षिणंस्तनमेवतु॥ प्र

त्वा स्वेषत्वरिष्याव्यमंत्राभ्यामभिमंत्रितम् उदङ्मुखं शिशुं क्रोडे शनैराधाय पाययेत् मातेवु
पलक्षणं॥ धात्रीच॥ वत्वरिष्याव्य॥ अन्ययाविशेषमाह स्तु अतः अस्राविते स्तने बालः पि
वत्स्तन्येन भूयसा पूर्णस्रोतावमी कासश्वासैर्भवति पीड़ितः॥ अभिमंत्रणमाह॥ क्षीरनीर
निधिस्तेस्तु स्तनयोः क्षीरपूरकः सदैव सुभगो बालो भवत्वेष महाबलः पयोमृतसमं पी
त्वा कुमारस्ते शुभानने॥ दीर्घमायुरवाप्नोतु देवाः प्राप्यामृतं यथा॥ मंत्रोपि त्वन्येन ब्राह्म
णेन वा पठनीयो यावन्मंत्रपाठस्तावन्मातृधात्र्यावा दक्षिणहस्तेन दक्षिणस्तनस्पर्शः का
र्यः॥ जनन्याक्षीराभावे धात्र्या अलाभे प्रकारमाह॥ क्षीरसात्म्यतया क्षीरमाजं गव्यमथा
पि वा॥ दद्यादास्तन्यपर्याप्तेर्बालेभ्यो वीक्ष्य मात्रया क्षीरसात्म्यतयेति॥ यतः शिशोः क्षी
रमेव सात्म्यं भवति न त्वन्नादिकम्॥ आस्तन्यपर्याप्तेरिति॥ यावत् स्त्रियाः स्तन्यस्या
समंततो भावेन प्राप्तिर्भवति॥ अथवा यावत् स्तन्यपानस्य योग्यता भवतीत्यर्थः॥ अथवा

लस्यान्नप्राशनसमयः यथोक्तविधिना बाले मासे षष्ठेऽष्टमेपि च॥ अन्नं संप्राशयेत्किंचित्तस्य
हृद्यं यथाक्रमात् अथ बालस्य परिचर्याविधिः बालमंके सुखं दध्यान्न चैनं तर्जयेत्क्वचित्॥
सहसा बोधयेन्नैव नायोग्यमुपवेशयेत्॥ अयोग्य[illegible]मुपवेशनासमर्थम्॥
नाकृष्य स्थापयेत्क्रोडे न तिर्यक्शायने क्षिपेत्॥ रोदयेन्न क्वचित्कार्यं विधिमावश्यकं विना
आवश्यको विधिः भेषजदानतैलाभ्यंगोद्वर्तनादिः तच्चित्तमनुवर्तेत तु तत्सदैवानुमोद
येत्॥ संसेवितमना एवं नित्यमेवाभिवर्द्धते॥ वातातपतडिद्वृष्टिधूमानलजलादितः
निम्नोच्चस्थानतश्चापि रक्षेद्बालं प्रयत्नतः [illegible] बालानां स्वभावाद्धितान्याह॥ अभ्यंगो
द्वर्तने स्नाने नेत्रयोरंजनं तथा॥ वसनं मृदु यत्तच्च तथा मृद्वनुलेपनं॥ जन्मप्रभृति प
थ्यानि बालस्यैतानि सर्वथा॥ बालस्य कवलादेः समयमाह॥ कवलः पंचमाद्वर्षाद
ष्टमान्नस्यकर्म च॥ विरेकः षोडशाद्वर्षाद्विंशते श्चैव मैथुनं॥ बाल्यादेरवधिमाह

30

सम्मतः वयस्तु त्रिविधं बाल्यं मध्यमं वार्द्धकं तथा॥ ऊनषोडशवर्षस्तु नरो बालो निगद्यते॥
त्रिविधः सोपि दुग्धाशी दुग्धान्नाशी तथान्नभुक्॥ दुग्धाशी वर्षपर्यंतं दुग्धान्नाशी शर
द्वयम्॥ तदुत्तरं स्याद् अन्नाशी एवं बालस्त्रिधा मतः॥ मध्यो षोडशसप्तत्यो मध्यमः कथितो
बुधैः॥ चतुर्द्धा मध्यमं प्राहुर्युवा ह्यात्रिंशतो मतः॥ चत्वारिंशत्समा यावत्तिष्ठेद्वीर्यादिपूरि
तः॥ ततः क्रमेण क्षीणः स्याद्यावद्भवति सप्ततिः॥ वीर्यादीत्यादिशब्देन रसादिसर्वधात्वि
न्द्रियबलोत्साह उच्यते॥ क्षीणः सर्वधात्विन्द्रियबलोत्साहैर्हीनः॥ ततस्तु सप्ततेरूर्द्ध्वं क्षी
णधातुरसादिकः॥ क्षीयमाणेन्द्रियबलः क्षीणरेता दिने दिने॥ वलीपलितखालित्ययु
क्तः कर्मसु चाक्षमः॥ कासश्वासादिभिः क्लिष्टो वृद्धो भवति मानवः॥ बाल्ये विवर्द्धते श्लेष्मा
पित्तं स्यान्मध्यमेऽधिकं॥ वार्द्धिके वर्द्धते वायुर्विचार्यैतदुपक्रमेत्॥ त्र यक्रमेत्विकि
त्सेत्॥ तेनेत्तरेतु॥ बाल्यं वृद्धिश्छवि मेधा त्वग्दृष्टिः शुक्रविक्रमो॥ बुद्धिं कर्मेन्द्रियं चे

तिजीवेत्तं दशभिर्दिवसैः ॥ अथ प्रकृतिलक्षणानि ॥ समप्रकृतयो नृणां वातपित्तकफात्तथा
संसर्गात्सन्निपाताच्च भवंतीति भिषजो मता ॥ शुक्रशोणितसंयोगे यो दोषस्तूत्कटो भवेत् ॥
प्रकृतिर्जायते तेन तस्याल्लक्षणमुच्यते ॥ वाग्भटेत्वात्रेयादयः शुक्रासृग्गर्भिणीभोज्यचे
ष्टागर्भाशयर्त्तंतरे ॥ यः स्याद्दोषोधिकस्तेन प्रकृतिः सप्तधोदिता ॥ सोपि दोषः स्वभावाव
स्थितो न तु दुष्टः ॥ दुष्टेन तु शुक्रशोणितयोर्दुष्टत्वाच्छुद्धगर्भासंभवात् ॥ प्रतिरूक्षोल्प
केशश्च स्फुटितांघ्रिकरश्च सः शीघ्रगो बहुवाक् शुष्कः स्वप्ने वियति गच्छति ॥ एवंविधो
यः स ज्ञेयो वातप्रकृतिको नरः ॥ पित्तप्रकृतिको यादृक् तादृशोऽपनिगद्यते ॥ अका
लपलितो गौरः क्रोधी स्वेदी च बुद्धिमान् ॥ बहुभुक् ताम्रनेत्रश्च स्वप्ने ज्योतींषि पश्यति
पित्तप्रकृतिकः ॥ श्यामकेशः क्षमी स्थूलो बहुवीर्यो महाबलः ॥ स्वप्ने जलाशयालो
की श्लेष्मप्रकृतिको नरः ॥ द्वंद्वप्रकृतौ यत्र रूपं दोषद्वयस्य तु ॥ तां संसर्गेण जानी

यात्सर्वलिंगैस्त्रिदोषजाम्॥ वाग्भटेतु॥ शीतद्विषश्च लघ्वतिस्मृतिवुद्धिचेष्टासौहा
र्द्द दृष्टिगतयोऽतिवहुप्रलापाः अल्पपित्तकफजीवितनिद्रासन्नसक्तवहुजर्जरवाचः
नास्तिकावहुभुजः सविलास गीतहास्यमृगयाकलिलोलाः मधुराम्लपटूष्णसात्म्य
कौल्ताकृश ... दीर्घाकृतयः सशब्दयानाः न दृढा न ... जितेंद्रियानचार्यानचकांता
(अंगानि) दयिताबहुप्रजावा॥ नेत्राणिचैषांखरधूसराणि वृत्तान्यचारूणि मृतोपमानि॥ उ
न्मीलितानीवभवंतिसुप्तेशैलद्रुमांतेगमनेप्रयांति॥ अधन्यामत्सराध्माताःस्तेनाः
प्रोद्बद्धपिंडिकाः श्वसृगालोष्ट्रगृध्राखुकाकोलूका: ... वातिकाः पित्तंवह्नि
र्वह्निजंचैतद्स्मात्पित्तोद्रिक्तस्तीव्रतृष्णोबुभुक्षुः गौरोष्णांगस्ताम्रहस्तांघ्रिवक्त्रः शूरोमा
नीपिंगकेशोऽल्परोमा॥ दयितमाल्यविलेपनमण्डनः सुचरितःशुचिराश्रितवत्सलः॥
विभवसाहसवुद्धिवलान्वितोभवतिभीषुगतिर्द्विषतामपिमेधावीप्रशिथिलितसं
नः

५२

धिवं धर्मो सोनारीणामनभिमतोऽल्पशुक्रकामः ॥ आवासश्चलितमरोगानीरके शुभमुलेऽ
ल्लमधुरकषायतिक्तशीतम् ॥ धर्मे द्वेषी खिदनः पूतगंधिर्मेर्युक्तारक्रोधपानाशने
ष्वसक्तः पश्येत्कर्णिकारान्पलाशान् दिग्दाहोल्काविद्युदर्कानलांश्च ॥ तनूनि पिंगानि
बलानि चैषां तन्वल्पपक्ष्माणि हि मप्रियाणि ॥ क्रोधेन मद्येन रवेश्च भासा रागं व्रजंत्या
शुविलोचनानि ॥ मध्यायुषो मध्यबलाः पंडिताः क्लेशभीरवः व्याघ्रदे कपि मार्जा
रवृकालस्तास्त्वपेतिकाः श्लेष्मासोमः श्लेष्मण सेनसोम्यो गूढास्थि गात्रश्लिष्टसंध्य
स्थिमांसः ॥ तेजस्त्व दुःखक्लेशधर्मे रततोयबद्धायुक्तः सात्विकः सत्यसंधः प्रियंगुदू
र्वाशरकांडदर्भगोरोचनापद्मसुवर्णवर्णः ॥ प्रलंबबाहुः पृथुपीनवक्षा महालला
टोद्घननीलकेशः ॥ मद्गः समसुविभक्तचारुदेहो बहुजारतिरसयुक्तसपुत्रमत्य
त्यः ॥ धर्मात्मा वदति न निष्ठुरं च जातु प्रच्छन्नं वहति हृदंडवैरं च वैरम् ॥ समुद्रद्विर

देंद्रतुल्ययानो जलदांभोधिमृदंगशंखघोषः स्मृतिमाननभियोगवान्विनीतो नचबा
ल्येप्यतिरोदनो नलोलः ॥ तिक्तकषायकटुकोष्णरू[illegible]दनमल्पंसंभुंक्ते बलवांस्तथा
पि ॥ रक्तांतिसुस्निग्धविशालदीर्घसुव्यक्तशुक्लासितपक्ष्मलाक्षः अल्पाल्परक्रोधपा
नाशनेहः प्रमाचित्तोदीर्घसूत्रीवदान्यः ॥ स्वेदं भीरः स्थूलवर्चाः क्षमावान्निद्रालुश्चा
अ= लेशवर्तः कृतज्ञः ॥ ऋजुर्विपश्चित्सुभगः सुलज्जो भक्तो गुरूणां [illegible] स्थिरसौहृदश्च ॥
स्वप्नेसपद्मान्सविहंगमालांस्तोयाशयान्पश्यतितोयदांश्च विष्णुरुद्रेंद्रवरुणतादे
हंसगजाधिपैः श्लेष्मप्रकृतयस्तुल्यास्तथासिंहाश्वगोवृषैः ननुप्रकृतिरुत्तमा मध्ये
योधिकः सत्वव्याधीन्कथंकरोति ॥ आशंकायामाह ॥ विषजातो यथा कीटो नविषेण
प्रबाध्यते ॥ तद्वत्प्रकृतयो मर्त्यं शक्नुवंति नबाधितुम् ॥ नविषेण प्रबाध्यते ॥ शक्नुवंति
नबाधितुं एतौद्वौ नआवपीयदर्थौ · तेन विषेण विषजदारादिना ॥ ईषत्स्वबाधते

त्रx२ नरु तीx२

नतुभ्रष्टोतयाचप्रकृतयः॥ प्रकृतिहि तवोदोषाः बाधितुं नशक्नुवंति कस्वरणस्फुटित
त्वखेदनिद्राधिक्यादिना ईषद्बाधितुंशक्नुवंत्येव॥ नतु ज्वरादिभिः प्रकोपोवाल्पभावोवा
तयोवा॥ नोपजायते॥ प्रकृतीस्वभावेनजायतेतुगतात्रुष॥२॥ इतिश्रीमिश्रलटकनत
नयश्रीमन्मिश्रभावविरचितेभावप्रकाशेबालप्रकरणंतृतीयम्॥३॥ अथदेशाः॥ भूमि
देशास्त्रिधानूपोजांगलोमिश्रलक्षणः तत्रानूपलक्षणं॥ नदीपल्वलशैलाढ्यः फुल्लोत्प
लकुलैर्युतः हंससारसकारण्डचक्रवाकादिसेवितः सरोवराहमहिषरुरुरोहितकुलाकुलः
प्रभूततरुमण्डव्याप्तोनीलशस्यफलान्वितः अनेकशालिकेदारकदलीद्रुविभूषितः आनू
पदेशो सौम्योवातश्लेष्मार्तिमान्॥ अथजांगललक्षणं॥ आकाशशुभ्रउच्चश्चस्वल्प
पानीयपादपः शमीकरीरबिल्वार्कपीलुकर्कंधुसंकुलः हरिणैणर्क्षपृषतगोकर्णख
रसंकुलः सुस्वादुफलवान्देशोवातलोजांगलंस्मृतः संत्रांतरेतु॥ बहूदकनगोऽनूपः

८ मपा

तx२

कफमारुतरोगवान्॥ जांगलोल्पांबुशाखीच पित्तासृङ्मारुतोत्तरः साधारणलक्षणमा
ह॥ संसृष्टलक्षणोयस्तु देशः साधारणो मतः समाः साधारणे यस्माच्छीतवर्षोष्णमारुताः
समता तेन दोषाणां तस्मात्साधारणो वरः॥ सुश्रुतात्॥ उचिते वर्तमानस्य नास्तिदुर्देशजं भ
यम्॥ आहारस्वप्नचेष्टादौ तद्देशस्य कृते सति॥ वृद्धवाग्भटात्॥ यस्य यो देशस्य यो जंतुस्त
ज्जं तस्योषधं हितं॥ देशादन्यत्र वसतस्तत्तुल्यगुणमौषधं॥ स्वदेशे निचिता दोषा अन्यस्मि
न्कोपमागताः बलवंतस्तथा न स्युर्जलजास्थलजास्तथा॥ अथ दिनादिचर्याः दिनचर्यां निशा
चर्यामृतुचर्यां यथोदितां॥ आचरन्पुरुषः स्वस्थः सदा तिष्ठति नान्यथा॥ अथ स्वस्थल
क्षणमाह सुश्रुते॥ समदोषः समाग्निश्च समधातुमलक्रियः प्रसन्नात्मेंद्रियमनाः स्वस्थ इ
त्यभिधीयते॥ क्रियात्मककर्मवीर्यतेन समक्रियः शारीरानुरूपकर्मा॥ तत्र दिनचर्यामाह
ब्राह्मेमुहूर्ते बुध्येत स्वस्थो रक्षार्थमायुषः तत्रदुःखस्य शांत्यर्थं स्मरेद्धि मधुसूदनम् ६।

दध्याज्यादर्शसिद्धार्थबिल्वगोरोचनास्रजां ॥ दर्शनं स्पर्शनं कार्यं प्रवुद्धेनम्रभावहं ॥ स्व
माननं घृते पश्ये घदीर्घे चिरजीवितम् ॥ आयुष्यमुषसि प्रोक्तं मलादीनां विसर्जनं ॥ तदंत्र
कूजनाध्मानोदरगौरववारणं ॥ आदिशब्देन [illegible] वातमूत्रादीनां ग्रहणं ॥ आटोपशूलौ प
रिकर्तिकां च संगः पुरीषस्य तथोर्द्ध्ववातः पुरीषमास्यादथवा निरेति पुरीषवेगेभिहते
नरस्य ॥ परिकर्तिका गुदे परिकर्तनवत्पीडा ॥ पुरीषस्य संगो निरोधः ऊर्द्धवातः उद्गा
रवा हृल्लासं ॥ वातमूत्रपुरीषाणां संगोध्मानं क्लमोरुजा ॥ जठरे वातजाश्चान्ये रोगाः स्यु
र्वातनिग्रहात् ॥ वस्तिमेहनयोः शूलं मूत्रकृच्छ्रं शिरोरुजाः विनामो वंक्षणानाहं ॥ स्याल्लिं
गं मूत्रनिग्रहे ॥ विनामः शरीरस्य नम्रता ॥ वंक्षणानाहं ॥ वंक्षणस्याकर्षणवत्पीडा ॥ न
वेगितोन्यकार्यः स्यान्न वेगान् वारयेद्बलात् ॥ कामशोकभयक्रोधान्मनोवेगान् विधार
येत् ॥ पादादिबलमार्गाणां शौचं कांतिबलप्रदं ॥ पवित्रकरमाख्यातमलक्ष्मीकलिपा

पहेत्॥प्रक्षालनेमनःप्रसादःपादयोःशुद्धिकारणं॥मलघ्नंमेहरंवृष्यंचक्षुष्यंरागतापहं
भक्षयेद्दंतधावनेद्वादशांगुलमायतनम्॥कनिष्ठिकाग्रवत्स्थूलमृज्वग्रंथितयाव्र
णं॥एकैकंघर्षयेद्दंतंमृदुनाकूर्चकेनतु॥दंतशोधनचूर्णेनदंतमांसान्यबाधयन्॥
क्षौद्रत्रिकटुकाक्तेनतैलसिंधुभवेनवा॥चूर्णेनतेजोवत्याश्चदंतान्नित्यंविशोध
येत्॥तेजोवतीतेजवल्कलइतिलोकेप्रसिद्धा॥मधूकोमधुरेश्रेष्ठःकरंजःक
टुकेतथा॥निंबःस्यात्तिक्तकेश्रेष्ठःकषायेखदिरस्तथा॥समयंतुसमालोक्यदोषं
चप्रकृतिंतथा॥यथादितैरसैर्युक्तंद्रव्यंप्रयोजयेत्॥तेनास्यरसवैरस्यगंधाजि वीर्ये x ४
ह्वास्यजाड्यगदाःरुचिवैशद्यलघुतानभवंतिभवंतिच॥अर्केवीर्यंवटेदीप्तिःकरंजे
विजयोभवेत्प्लक्षेचैवार्थसंपत्तिर्वदर्यांमधुरोध्वनिःखदिरेमुखसौगंध्यंविल्वे
तुविपुलंधनं॥उदुंबरेतुवाक्सिद्धिराम्रे त्वारोग्यमेवच॥कदंबेतुधृतिर्मेधा

वंपके हृद्वाक्स्मृतिः शिरीषे कीर्तिसौभाग्यमायुरारोग्यमेव च ॥ अपामार्गे धृतिर्मेधा
प्रज्ञाशक्तिस्तथाध्वनिः ॥ दाडिम्यां सुंदराकारः ककुभे कुटजे तथा जाती नगरमंदारे
दुःस्वप्नं च विनश्यति ॥ नखादेर्न्नलतां ल्वोष्ठ जिह्वादंतगदेषु तत् ॥ मुखस्य पाके शो
षे च स्वासकासवमीषु च ॥ दुर्बलोऽजीर्णभुक्तश्च हिक्का मूर्छामदान्वितः ॥ शिरोरु
जार्तस्तृषितः श्रांतः पानक्लमान्वितः ॥ अर्दिती कर्णशूली च नेत्ररोगी नवज्वरी ॥
वर्जयेद्दंतकाष्ठं तु हृद्रामययुतोपि च ॥ अजीर्णभुक्तः न जीर्णे भुक्तं यस्य सः जिह्वा
निर्लेखनं हैमराजतं ताम्रजं तथा पाटितं तन्न मृदु काष्ठमृदु पत्रमयं तथा तत्का
ष्ठं दंतशोधनयोग्यकाष्ठं ॥ दशांगुलं मृदु स्निग्धं तेन जिह्वां लिखेत्सुखं ॥ तज्जि
ह्वामलवैरस्यदुर्गंधजडताहरं ॥ गंडूषमपि कुर्वीत शीतेन पयसा मुहुः कफतृ
ष्णामलहरं मुखांतःशुद्धिकारकं ॥ सुखोष्णोदकगंडूषः कफारुचिमलापहः

41

रक्तपित्तजित्॥ मुखस्य पिडकाशोषनीलिकाव्यङ्गनाशनं॥ कफे चापि कटुष्णेन पयसा२

दंतजाड्यहरं चापि मुखलाघवकारकं॥ मुखप्रक्षालनं शीतपयसा रक्तविशोध

नम्॥ कफवातहरं स्निग्धं मुखशोषविनाशनं॥ कटुतैलादि नस्यार्थे नित्याभ्या

सेन योजयेत्॥ प्रातः श्लेष्मणि मध्याह्ने पित्ते सायं समीरणे सुगंधवदनाः स्निग्धा

निःस्वना विमलेन्द्रियाः निर्वलीपलितव्यंगा भवेयुर्नस्यशीलिनः सौवीरमं

जनं नित्यं हितमक्ष्णोस्ततो भजेत्॥ लोचने भवतस्तेन मनोज्ञे सूक्ष्मदर्शने॥ सौवी

रं श्वेतसुरमा इति लोके प्रसिद्धम्॥ स्रोतोऽञ्जनं मतं श्रेष्ठं विशुद्धं सिंधुसंभवं

दृष्टेः कंडूमलहरं दाहक्लेदरुजापहं॥ अक्ष्णो रूपावहं चैव सहते मारुतात

पौ॥ नेत्ररोगा न जायंते तस्मादंजनमाचरेत्॥ स्रोतोंजनं कृष्णसुरमा इति लो

के॥ विशुद्धं शोधनं विनापि सिंधुसंभवं सिंधुनामा पर्वतस्तत्र भवं॥ रात्रौ

जागरितः श्रांतश्छर्दितो भुक्तवांस्तथा॥ ज्वरातुरः शिरःस्नातो नाक्ष्णो रंजन

42

माचरेत्॥पंचरात्राद्वा श्मश्रुकेशरोमाणि कर्तयेत्॥केशश्मश्रुनखादीनां कर्त
नं संप्रसाधनम्॥पौष्टिकं धन्यमायुष्यं शौचकांतिकरं परं॥संप्रसाधनं शोभा
जनकम्॥उत्पाटयेत्तु लोमानि नासाया न कदाचन॥तदुत्पाटनतो दृष्टेर्दौर्ब
ल्यमुपजायते॥केशपाशे प्रकुर्वीत प्रसाधन्या तु साधनं॥केशप्रसाधनं केश्यं
रजोजंतुमलापहं॥आदर्शालोकनं प्रोक्तं मंगल्यं कांतिकारकं॥पौष्टिकं बल्य
मायुष्यं पापाऽलक्ष्मीविनाशनं॥लाघवं कर्मसामर्थ्यं विभक्तघनगात्रता॥दोष
क्षयोग्निवृद्धिश्च व्यायामादुपजायते॥व्यायामदृढगात्रस्य व्याधिर्नास्ति कदाच
न॥विरुद्धं वा विदग्धं वा भुक्तं शीघ्रं विपच्यते॥भवंति शीघ्रं नैनं तस्य देहे शिथिल
तादयः॥न चैनं सहसाक्रम्य जरा समधिरोहति॥न चास्ति सदृशं तेन किंचित्स्थौ
ल्यापकर्षकं॥समदागुणमाधत्ते बलिनां स्निग्धभोजनां वसंते शीतसमये सन्नरो

सहितोमतः॥ अन्यदापि च कर्त्तव्यो बलार्द्धेन यथाबलम्॥ हृदयस्थो यदा वायुर्वक्त्रं शीघ्रं प्रपद्यते॥ मुखं च शोषं लभते तद्बलार्द्धस्य लक्षणम्॥ किं वा ललाटे नासायां गात्रसंधिषु कक्षयोः॥ यदा संजायते स्वेदो बलार्द्धं तु तदा दिशेत्॥ भुक्तवान् कृतसंभोगः कासी श्वासी कृशः क्षयी॥ रक्तपित्ती क्षती शोषी न तं कुर्यात्कदाचन॥ अतिव्यायामतः कासो ज्वरश्छर्दिः श्रमः क्लमः॥ तृष्णा क्षयः प्रतमको रक्तपित्तं च जायते॥ अभ्यंगं कारयेन्नित्यं सर्वेष्वंगेषु पुष्टिदं॥ शिरः श्रवणपादेषु तं विशेषेण शीलयेत्॥ सार्षपं गंधतैलं च यत्तैलं पुष्पवासितं॥ अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन॥ गंधतैलं गंधद्रव्याणामगर्वादीनामग्नियोगेन निष्कासितः स्नेहः॥ अभ्यंगो वातकफहृत् श्रमशांतिं बलं सुखं॥ निद्रावर्णमृदुत्वायुः कुरुते देहपुष्टिकृत्॥ अभ्यंगशीलिनो मूर्द्धि सकलेंद्रियतर्पकः॥ दृष्टिपुष्टिकरो हंति शिरोभूमिगतान् गदान्॥

43

केशानां बहुतां दार्ढ्यं मृदुतां दीर्घतां तथा॥ कृष्णतां कुरुते कुर्याच्छिरसः पूर्णतामपि॥ न
कर्णरोगा न मलं न च मन्याहनुग्रहः॥ नोच्चैः श्रुतिर्न बाधिर्य्यं स्यान्नित्यं कर्णपूरणात्॥ र
साद्यैः पूरणं कर्णे भोजनात्प्राक् प्रशस्यते॥ तैलाद्यैः पूरणं कर्णे भास्करेऽस्तमुपागते॥ पादा
भ्यंगश्च तत्स्थैर्य्यं निद्रादृष्टिप्रसादकृत्॥ पादसुप्तिश्रमस्तंभसंकोचस्फुटनप्रणुत्॥
व्यायामक्षुण्णवपुषं पद्भ्यां संमर्दितं तथा॥ व्याधयो नोपसर्पंति वैनतेयमिवोरगाः॥
लोमकूपैः शिराजालैर्धमनीभिः कलेवरे॥ तर्प्पयेद्बलमाधत्ते स्नेहो युक्तोऽवगाहने॥ अ
द्भिः संसिक्तमूलानां तरूणां पल्लवादयः॥ वर्द्धंते हि तथा नृणां स्नेहसंसिक्तधातवः॥
नवज्वरी अजीर्णी च नाभ्यक्तव्यः कथंचन॥ तथा विरिक्तो वांतश्च निरूढो यस्तु मान
वः॥ निरूढः दत्तो निरूहवस्तिर्यस्मै सः॥ पूर्वयोः कृच्छ्रता व्याधेरसाध्यत्वमथापि वा॥ शे
षाणां तदहः प्रोक्ता वह्निमांद्यादयो गदाः॥ पूर्वयोस्तरुणज्वरिणोऽजीर्णिनश्च॥ उद्वर्त

नेकफहरं मेदोघ्नं शुक्रदं परं ॥ वल्यं शोणितकृच्चापि त्वक्प्रसादकरं हृत्वकृत् ॥ मुखे लेपा
द्दृढं वक्त्रं पीनोगंडस्तथाननः कांतमव्यंगपिडकं भवेत्कमलसन्निभं ॥ दीपनं वृष्य
मायुष्यं स्नानमोजोबलप्रदं ॥ कंडूमलश्रमस्वेदतंद्रातृड्दाहपापजित् ॥ वारिण्यस्मसे
कैः शीताद्यैरुष्णांतर्याति पीडितः ॥ नरस्य स्नातमात्रस्य दीप्यते तेन पावकः ॥ शीते
न चांभसा स्नानं रक्तपित्तप्रशांतिकृत् ॥ नदेवोष्णेन तोयेन वल्यं वातकफापहम् ॥
शिरःस्नानमथात्युष्णमंबुना नेत्रहा सदा ॥ वातश्लेष्मप्रकोपे तु हितं तच्च प्रकीर्तितं ॥
शीतेन चांभसा स्नानं पयः पयःपानेन वांछितः ॥ एतद्धि मानवाः पथ्यं स्निग्धम
ल्पं च भोजनम् ॥ हरिद्रादस्येन तत् ॥ यः सदामलकैः स्नानं करोति सुविनिश्चितम्
वलीपलितनिर्मुक्तो जीवेद्वर्षशतं नरः ॥ स्नानं ज्वरेतिसारे च नेत्रकर्णानिलार्ति

निघ्नं॥ आध्मानपीनसाजीर्णभुक्तवत्सु च गर्हितम्॥ स्नानस्यानंतरं सम्यक् वस्त्रेणांगस्य
मार्जनं॥ कांतिप्रदं शरीरस्य कंडूत्वग्दोषनाशनं॥ कौशेयं चौर्णिकं वस्त्रं चरक्तं वस्त्रं तथैव
व च॥ वातश्लेष्महरं तत्तु शीते काले विधारयेत्॥ कौशेयपट्टांवरं॥ टसरवस्त्रं च॥ मे
ध्यं सुशीतं पित्तघ्नं कषायं वस्त्रमुच्यते॥ तद्धारयेदुष्णकाले तच्चापि लघु शस्यते॥ कषा
यं कोकटी इति लोके॥ कषायं रागरक्तं वा॥ शुक्लं तु शुभदं वस्त्रं शीतातपनिवारणं॥ न
चोष्णं न च वा शीतं तत्तु वर्षासु धारयेत्॥ यशस्यं काम्यमायुष्यं श्रीदं मानंदवर्द्धनं॥ लघ्वं
वशीकरं शुभ्रं नवं निर्मलमेवरं॥ काम्यकाम्योह्दीयकम्॥ कदापि न जनैः सद्भिर्धार्यं म
लिनमंबरं॥ तत्तु कंडूकृमिकरं ग्लानं चालक्ष्मीकरं परं॥ अलक्ष्मीर शोभादारिद्र्यं च॥
कुंकुमेन चंदनेन वापि कृष्णागरुविमिश्रितं॥ उष्णं वातकफध्वंसि शीतकाले तदिष्यते॥

वे॰

चंदनं घनसारेण वालकेन च मिश्रितं।

४ घुसृणं कुंकुमं ॥ सुगंधि परमं शीतं ग्रीष्मकाले प्रशस्यते ॥ घनसारः कर्पूरः ॥ वालं ह्रीवेरं ॥
चंदनं घुसृणोपेतं मृगनाभिसमायुतं ॥ नवोष्मनववाशीतं वर्षाकाले तदिष्यते ॥ घुसृ
णं कुंकुमं ॥ मृगनाभिः कस्तूरी ॥ अनुलेपस्तु पामघ्नो दुर्गंधस्वेददाहजित् ॥ सौभाग्यतेज
स्त्वग्वर्णप्रीत्योजोवलवर्द्धनः ॥ स्नानायानर्हलोकानामनुलेपो विनोहितः ॥ सुगंधिपुष्प
पत्राणां धारणं कांतिकारकम् ॥ पापरक्षोग्रहहरं कामदं श्रीविवर्द्धनं ॥ स्वर्णे [illegible]षयेद
गं यथायोग्यं विधानतः अपि सौभाग्यसंतोषदायकं कांचनस्मृतम् ॥ ग्रहदृष्टिहरं पुष्टिक
रं दुःस्वप्ननाशनं ॥ पापदौर्भाग्यशमनं रत्नाभरणधारणं ॥ माणिक्यं तरणेः सुजात्यम
मलं मुक्ताफलं शीतगोः माहेयस्य च विद्रुमो निगदितः सौम्यस्य गारुत्मतं ॥ देवेज्यस्य
च पुष्परागमसुरामात्यस्य वज्रं शनेर्नीलं निर्मलमन्ययोर्निगदिते गोमेदवैडूर्यके ॥ वासः
स्रग्गंधरत्नानां धारणं प्रीतिवर्द्धनं ॥ रक्षोघ्नमर्थ्यमोजस्यं सौभाग्यकरमुत्तमं ॥ सततसि ६

ता= वा४

मंत्रस्यमहौषध्यास्तथैवच॥रोचनासर्षपाणांचमंगल्यानांचधारणं॥आयुर्लक्ष्मीकरंर
क्षोहरंमंगलदंशुभं॥हिंस्रादिभयविध्वंसिवशीकरणकारकं॥ततोभोजनवेलायांकुर्या
न्मंगलदर्शनं॥तस्यप्रदक्षिणंनित्यमायुर्धर्मविवर्द्धनं॥लोकेस्मिन्मंगलान्यष्टौब्राह्मणोगो
र्हुताशनः॥पुष्पस्रक्सर्पिरादित्यआपोराजातथाष्टमः॥पादुकारोहणंकुर्यात्सर्वभोजनतः
परं॥पादरोगहरंवृष्यंचक्षुष्यंचायुषोहितम्॥शरीरेजायतेनित्यमिष्टान्नदृणांचतुर्विधा
विभुक्षाचपिपासाचसुषुप्सासुरतस्पृहा॥भोजनेच्छाविघातात्स्यादंगमर्दोरुचिःश्रमः॥
तंद्रालोचनदौर्वल्यंधातुदाहोबलक्षयः॥विघातेचपिपासायाःशोषःकंठास्ययोर्भवेत्
श्रवणस्यावरोधश्चरक्तशोषोहृदिव्यथा॥निद्राविघाततोजृंभाङ्गशिरोलोचनगौरवं॥अं
गमर्दस्तथातंद्रास्यादन्नापाकएवच॥भवेत्मूत्राशयेपायोशुक्रयोश्चपयुर्व्यथा॥मूत्ररो
धःप्रमेहश्चवातकुंडलिकादयः॥हृष्टेराधःछन्नेनाशुक्राश्मरीशुक्रस्यधारणात्॥त्रिभुदि

तोन्तयोग्यान्निनस्माहारेंधनवर्जनात्॥मंदीभवतिकायाग्निर्यथाचाग्नि निरिंधनः॥आ
हारंपचतिशिखीदोषानाहारवर्जितःपचति॥दोषक्षयेचधातून्पचतिचधातुक्षये
प्राणान्॥आहारःप्रीणनःसद्योबलकृद्देहधारणः॥स्मृत्यायुःशक्तिवर्णौजःसत्वशो
भाविवर्द्धनः॥यथोक्तगुणसंपन्नंनरःसेवेतभोजनं॥विचार्यदोषकालादीन्कालयोरुभ
योरपि॥उभयोःकालयोःप्रातःसायंच॥तथाच॥सायंप्रातर्मनुष्याणामशनंदेव
निर्मितम्॥नांतराभोजनंकुर्यादग्निहोत्रसमोविधिः॥प्रातःप्रथमयामादुपरिद्विती
ययामादर्वाक्॥तथाच॥याममध्येनभोक्तव्यंयामयुग्मंनलंघयेत्॥याममध्येरसो
त्पत्तिर्यामयुग्माद्बलक्षयः॥अन्यच्च॥तृत्संभवतिपक्वेषुरसदोषमलेषुचकालेवाप
दिवाकालेसोच्चकालउदाहृतः॥रसादीनांपाकंकालमाह॥उद्गारशुद्धिरुत्साहोवेगो
त्सर्गोयथोचितः॥लघुताक्षुत्पिपासाचयदाकालःसभोजने॥आहारांतरहःकुर्या

६०

नि[illegible]हार[illegible]योगाः मपि सर्वदा उभाभ्यां लद्दमुपेतः स्यात्स्वकाशोहीयतेक्रियाः निहारोमलमूत्रोत्सर्गः॥ गृहस्थ आहार विहार योगाः सहैव सद्भिर्विजने विधेयाः इति भोजनपात्रमाह॥ सौवर्ण[illegible]हृद्यंदं पथ्यं हैमं भोजनभाजनं॥ रौप्यं भवति चक्षुष्यं पित्तहत्कफवातकृत्॥ कांस्यं बुद्धिप्रदं रुच्यं रक्तपित्तप्रसादनं॥ पैत्तलं वातकृद्रूक्षमुष्णं कफप्रणुत्॥ आयसे कांलपात्रे च भोजनं सिद्धिकारकं॥ शोथपांडुहरं [illegible]बल्यं कामलापहमुत्तमं॥ शैलेयम्मण्मये पात्रे भोजनं श्रीनिवारणं॥ दारुजं वै विशेषेण रुचिदं श्लेष्मकारि च॥ पात्रं पत्रमयं रुच्यं दीपनं विषपापनुत्॥ जलपात्रं तु ताम्रस्य तदभावे मृदो हितम्॥ पवित्रं शीतलं पात्रं घटितं स्फटिकेन यत्॥ कांचने रचितं तद्वत्‌ यावैडूर्यसंभवम्॥ भोजनाग्रे सदा पथ्यं लवणार्द्रकभक्षणं॥ अग्निसंदीपनं रुच्यं जिह्वाकंठविशोधनं॥ ननु लवणस्य पित्तजनकत्वादार्द्रकस्य कटुकत्वेन पित्तलत्वाद्धि मुदित्त

कृमि ५

प्रथमं

सच्च दूषितस्य कथं लवणार्द्रकभक्षणमुचितम्॥ उच्यते॥ लवणं सैंधवं ज्ञेयं वैद
नेरक्तचंदनं॥ इति वचनाल्लवणमत्र सैंधवं॥ सैंधवं तु त्रिदोषघ्नं॥ यत आह गुण
ग्रंथे॥ सैंधवं लवणं स्वादु दीपनं पाचनं लघु॥ स्निग्धं हृद्यं हिमं वृष्यं सूक्ष्मं नेत्र्यं त्रिदो
षहृत्॥ आर्द्रकं तु कटुकमपि न पित्तविरोधि मधुरपाकित्वात्॥ यत आह तत्रैव॥ १॥
द्वितो॰ आर्द्रिका भेदिनी गुर्वी ती[illegible]ष्णा दीपनी च सा॥ कटुका मधुरा पाके रूक्षा वातकफाप
हा॥ अथ चान्यदपि॥ लवणमार्द्रकं वा नापि तु विरोधि संयोगस्वभावात्॥ संयोगस्वभा
वमेवेताहृष्टं॥ भोजनस्य पूर्वं लवणार्द्रकभक्षणं तु द्वोधकं वचनमेव प्रमाणं यति भोजना मा
दौ दृष्टिदोषविनाशाय ब्रह्मादीन् संस्मरेत्॥ यथा॥ अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो म
हेश्वरः॥ इति संचिंत्य भुंजाने दृष्टिदोषो न बाधते॥ अंजनीगर्भसंभूतं कुमारं ब्रह्मचा
रिणं॥ दृष्टिदोषविनाशाय हनुमंतं स्मराम्यहं॥ अ[illegible]यातन्मनाभूत्वा सर्वं तु मधुरं सं २
[illegible]म्॥ मध्येऽम्ललवणोपस्कात् कटुतिक्तकषायकान्॥ फलादीन्यादौ समश्नीयाद् दाडिमा

दीप्तिर्बुद्धिमान्॥ विनाम्लं फलं तद्वद्वर्जनीया च कर्कटी॥ मृणालविसशालूककंदेक्षुप्र
भृतीनपि॥ पूर्वमेव हि भोज्यानि न तु भुक्त्वा कदाचन॥ मृणालं पद्मनाले विशंमृशोडकं॥
शालूककंदमसिद्धं॥ गुरु पिष्टमयं द्रव्यं तंडुलान्पृथुकानपि॥ न जातु भुक्तवान्खादे
न्मात्रां खादेद्बुभुक्षितः॥ घृतपूर्वं समश्नीयात्कठिनं प्राक्ततो मृदु॥ अंते पुनर्द्रवाशी च
बलारोग्येण मुंचति॥ प्रथमर्थः॥ प्राणी घृतपूर्वं कठिनमश्नीयात्॥ यथा काश्यादिवा
सिनः॥ प्रथमं सव्यंजनो घृतपूर्वो रोटिकां भुंजते। ततो मृदु सस्पादिमोदनं भुंजते।
अंते पुनर्द्रवाशी॥ भोजनांते दधितक्रदुग्धादि भुंजते॥ यद्यत्स्वादुतमं तत्तद्विदध्यादु
त्तरोत्तरं॥ भुक्त्वा यत्प्रार्थ्यते भूयस्तदुक्तं स्वादुभोजनं॥ स्वाद्वन्नस्य गुणमाह॥ सौमनस्यं
बलं पुष्टिमुत्साहं बुद्धिमायुषः स्वादु संजनयत्यन्नमस्वादु च विपर्ययं॥ उष्णमान्नं
बलं हंति शीतमुष्णं बहुजेरं॥ अतिक्लिन्नं ग्लानिकरं युक्तियुक्तं हि भोजनम्॥ अति
द्रुताशिताहारो गुणान्न दोषान्नविंदते॥ भोज्यं शीतमहद्यं च स्याद्विलंबितमश्नतः गुरु

घृतः

ग्रं४२

त्रि[illegible]विधं तन्निवारयन्नाह॥ मंदानलो नरो द्रव्यं मात्रागुरु विवर्जयेत्॥ स्वभावतश्च गुरुय
त्नया संस्कारतो गुरु॥ मात्रागुरुस्तु मुद्गादिर्माषादिर्प्रकृतेर्गुरुः॥ संस्कारगुरु पिष्टान्नं प्रोक्त
मित्युपलक्षणं॥ आहारं षड्विधं चूष्यं पेयं लेह्यं तथैव च॥ भोज्यं भक्ष्यं तथा चर्व्यं गुरु विद्या
द्यथोत्तरं॥ चूष्यमिक्षुदाडिमादि॥ पेयं पानकमर्थकेरोदकादि॥ लेह्यं रसालाकृथितादि॥
कृथितानकटी इति लोके॥ भोज्यं भक्तस्त्यादि॥ भक्ष्यं लड्डुकमंडकादि॥ चर्व्यं चिपिटकधा
नादि॥ स्वभावगुरु संस्कारगुरुणोः स्वभावलघुनश्च भक्ष्यस्य भोजनपरिमाणमाह॥ गु
रूणामर्द्धसौहित्यं लघूनां तृप्तिरिष्यते॥ अयमर्थः॥ माषपिष्टान्नादिभिरर्द्धसौहित्यं
कर्त्तव्यं॥ मुद्गादिभिः स्वभावादेव लघुभिर्मात्रया तृप्तिः कर्तव्या इत्यर्थः॥ द्रवो द्रवोत्त
रश्चापि न मात्रागुरुरिष्यते॥ द्रवः पेयादि॥ द्रवोत्तरः तक्राघृतिक ओदनादिः मात्रा
धिकोपि मात्रागुरुर्नमंतव्यः॥ पेयस्य सर्वतो लघुत्वात्॥ उक्तं च सुश्रुते॥ पेयलेह्यादि
भक्ष्याणां गुरु विद्याद्यथोत्तरमिति॥ पेयं पयआदि॥ लेह्यं रसालादि॥ आदिशब्दात्॥

भोज्यमोदनसूपादि॥भक्ष्यंमोदकादि॥द्रवाढ्यमपिशुष्कं सम्यगेवोपपद्यते विशुष्कम

भ्यवहृतंनपाकंसाधुगच्छति॥ अयमर्थः॥शुष्कमपिस्रोतोरोधकरमपिद्रवाढ्यंसम्यक्

पाकंयाति॥केवलस्यचशुष्कान्नस्यदोषमाह॥विशुष्कमन्नमित्यादि॥अपक्वंतत्किंम

पाकंयाति॥पिंडीकृतम्॥अष्ठी

वनीस्यपेत्ताप्यामाह॥पिंडीकृतमसंक्लिन्नंविदाहमुपगच्छति॥पिंडीकृतम्॥अष्ठी

लावद्धृतम्॥असंक्लिन्नंनसम्यगार्द्रंविदाहमुपगच्छति॥विदग्धंभवतीत्यर्थः॥शु

ष्कादीनांवैगुण्यमाह॥शुष्कंविरूढंविष्टंभिवह्निव्याघातकृद्भवेत्॥शुष्कंचिपिटादि॥

विरूढंक्षीरमत्स्यादि॥विष्टंभिचणकमसूरकादि॥वह्निमांद्यंकुर्यात्॥नभुक्त्वानर

दे॥ध्मात्वाननिशायांनवाबहून्॥नजलांतरितानद्भिःशाकूनघात्वकेवलान्॥धनदी

नेपृथक्पानेसामिषंपयसानिषि॥दत्तच्छेदनमध्ये वसप्तशाकुष्ठवर्जयेत्॥विष

माशनस्यलक्षणमाह॥प्राधान्येऽल्पमा[illegible]टोपशूलाश्चकुरुतेऽधिकं॥हीनमात्र

55

तनोः कार्श्यं करोति च बलक्षयं ॥ अधिकं मात्राधिकम् ॥ अकालभुक्तस्य दोषमाह ॥ अ
प्राप्तकाले भुंजानो ह्यसमर्थतनुर्नरः ॥ तांस्तान्व्याधीनवाप्नोति मरणं चाधिगच्छति ॥ अ
प्राप्तः कालः अबुभुक्षितः व्याधीन् शिरोव्यथाविसूचिकालसकविलंबकादीन् प्राप्नोति ॥

मा४ तेषां बाधिक्ये मरणमपि प्राप्नोतीत्यर्थः ॥ काले ऽतीते ऽन्नतो जंतोर्वायुनोपहतेनले ॥ कुक्षि
द्विप चर्यते भुक्तेन स्याद्वोक्तुं पुनः स्पृहा ॥ कुक्षेर्भागद्वयं भोज्यैस्तृतीयं वारि पूरयेत् ॥ वा
योः संचरणार्थाय चतुर्थमवशेषयेत् ॥ रसेनान्नस्य रसना प्रथमेनोपतर्पिता ॥ न
तथास्वादुमाप्नोति ततः शोधं बुभुक्षितः ॥ अल्पं बुपानान्न विपच्यते ऽन्नमनंबुपानाच्च
स एव दोषः ॥ तस्मान्नरो वह्निविवर्द्धनाय मुहुर्मुहुर्वारि पिबेदभूरि ॥ भुक्तस्यादौ जलं पी
तं कार्श्यमंदाग्निदोषकृत् ॥ मध्ये ऽग्निदीपनं श्रेष्ठमंते स्थौल्यकफप्रदं ॥ अन्यच्च ॥ १
समस्थूलकृशा भुक्तमध्यांतप्रथमांबुपाः इति वाग्भटः ॥ भुक्तं भोजनं ॥ तृषितस्तु न चाश्नी

यात्क्षुधितो न पिबेज्जलं॥ तृषितस्तु भवेद्गुल्मी क्षुधितस्तु जलोदरी॥ ननु शिष्टा भोज
नन्
नान्ते दुग्धं पिबन्ति कथमुचितम्॥ यतस्त्रिधा विभक्तस्य भोजनकालस्य प्रथमो भागो
वातस्य द्वितीयः पित्तस्य तृतीयः कफस्य॥ यत एवाह॥ अश्नीयात्तन्मना भूत्वा पूर्वं तु
पश्चा
मधुरं रसं॥ मध्येऽम्ललवणौ॰ कटुतिक्तकषायकान्॥ अस्यायमभिप्रायः॥ भोजने पू
मु
र्वं भुक्तो मधुरो रसो वृद्धस्य वातपित्तयोः शामको भवति॥ भोजनमध्ये भुक्तावम्ल
लवणौ पित्ताशये च वह्निवृद्धिं कुरुतः॥ भोजनान्तसमये भुक्ताः कटुतिक्तकषायर
साः कफं शामयंति अतो भोजनावसानसमयस्य कफकालत्वात्तत्र कथं श्लेष्मजन
कं दुग्धं पातुमुचितं भवति॥ यत उक्तम्॥ दुग्धं स्वादु रसं स्निग्धमोजस्यं धातुवर्द्ध
नं॥ वातपित्तहरं वृष्यं श्लेष्मलं गुरु शीतलमिति॥ उच्यते॥ विदाहीन्यन्नपानानि
यानि भुंक्ते हि मानवः तद्विदाहप्रशान्त्यर्थं भोजनान्ते पयः पिबेत्॥ तथाच सुश्रु

यते॥ कुर्यात्क्षीरांतमाहारं दध्यंतं न कदाचनेति॥ लवणाम्लकटूष्णानि विदाहीन्य
तिमात्रतु॥ तद्दोषहर्तुमाहारं मधुरेण समापयेत्॥ भोजनावसानसमये दुग्धादि
भोजनेन वर्द्धितः कफो लवणाम्लकटुभोजनजनितपित्तस्य वृद्धिं विनाशयति॥
पित्तवृद्धिविनाशनेन कफस्यापि वृद्धिस्तु क्षीणा भवति॥ क्षीणकफवृद्धिरग्निमांद्यादी
न्व्याधीनुत्पादयितुं न शक्नोति॥ ननु शत्रोर्नाशनेन शत्रुहंतुर्वृद्धिर्दृश्यते। न तु क्षीणता
तत्कथं कफः क्षीण इति॥ उच्यते॥ बलवच्छत्रुविनाशनेन शत्रुहंतुः क्षीणता च दृश्यते॥
तथा च॥ नाशनात्स्वप्रत्यनीकस्य स्वयं च क्षीयते यथा वह्निसंतप्तलोहस्य तप्ततां नाशयेज्ज
लं॥ ननु भोजनावसानसमये भुक्ताः कटुतिक्ताः कषायाः रसाः कफं शमयिष्यंति॥ वा
तवृद्धिं विधास्यंतीति चेत्॥ तन्न वातस्यापि वृद्धिं हंतुं दुग्धं समर्थं भवत्यतो भोजनांते दुग्धा
दिमधुरभोजनमुचितमेवेति॥ सिद्धांतः किंच कटुम्लादीनां क्षीणशक्तिकत्वात् तन

इति×२

याच॥ यद्वैकं नाशयेद्दोषं तत्सामान्यं वर्द्धयेत्कुतः नाशने लेकदोषस्य यत्नस्तत्क्षीणशक्ति
कमिति॥ वस्तुतो य एव रसः प्राचुर्येण भुक्तस्तस्यैव सर्वे रसा वशगा भवंति॥ यतश्चाह सु
श्रुतः॥ जग्धाः सर्वे पिशाच्छंति बलिनो वश्यतां रसाः यथा प्रकुपिता दोषा वशं यांति बलीयसः
बलिनः रसस्य॥ बलीयसः दोषस्य॥ एवं भुक्त्वा समाचामेद्दंष्ट्रग्रहणपूर्वकं॥ भोजने दंतलग्ना
नि निर्हृत्याचमनं चरेत्॥ दंतांतरगतं चान्नं शोधनेनाहरेच्छनैः कुर्याद्दंतनिर्हृतं तत्र हि मुखस्यानि
ष्टगंधता॥ दंतलग्नमनिर्हार्यं लेपं मन्येत दंतवत्॥ न तत्र बहुशः कुर्याद्यत्नं निर्हरणं प्रति आ
चम्य जलयुक्ताभ्यां पाणिभ्यां चक्षुषी स्पृशेत्॥ तंत्रांतरेपि॥ घृष्ट्वा पाणितले वारि चक्षुषोर्यदि
दीयते॥ अचिरेणैव कालेन तिमिराणि व्यपोहति॥ अपरं च॥ शर्यातिं च सुकन्यां च च्यवनं श
क्रमश्विनौ॥ भोजनांते स्मरेद्यस्तु चक्षुस्तस्य न हीयते॥ इति भुक्त्वा च संस्मरेन्नित्यमगस्त्यादीन्सुखा
वहान्॥ विषघ्रात्मा तथैवान्नं परिणामसुखावेतया॥ सत्येन तेन मद्भुक्तं जीर्यत्वन्नमिदं तया॥ अ

गस्त्यं कुंभकर्णं च शनिं च वडवानलम्॥ आहारपरिपाकोदरं॥ अगस्तिरग्निर्वडवानलश्च भुक्तं
ममान्नं जरयत्वशेषम्॥ सुखं च मे नत्वरिणाम संभवं यच्छत्व रोगं मम चारु देहे॥ आत्मनश्च परे
षां च दुष्टदृग्दोषनाशने॥ भोजनांते स्मरेन्नित्यं कुमारं दमुनिपुंगवं॥ अगारक मगस्तिं च पाव
कं सूर्यमश्विनौ॥ यश्चैतान्संस्मरेन्नित्यं भुक्तं तस्याशु जीर्यति॥ इत्युच्चार्य स्वहस्तेन परिमार्ज्य
तयोदरं॥ अनायासप्रदायीनि कुर्यात्कर्माण्यतंद्रितः॥ अतंद्रितः जाग्रत्तिष्ठेत न तु सुप्यात्॥
भुक्तमात्रस्य तु स्वप्नाद्धंत्यग्निं कुपितः कफ इति वचनात्॥ जीर्णेऽन्ने वर्द्धते वायुर्विदग्धे पित्त
मेधते॥ भुक्तमात्रे कफश्चापि क्रमोऽयं भोजनोपरि॥ विदग्धे किंचिदपक्वे॥ किंचित्पक्वे॥ भुक्त
मात्रे संजातस्य कफस्य प्रतीकारमाह॥ धूमेनापोह्य हृद्यैर्वा कषायकटुतिक्तकैः॥ पूगकर्पूरक
स्तूरीलवंगसुमनःफलैः॥ फलैः कटुकषायैर्वा मुखवैशद्यकारिभिः॥ तांबूलपत्रसहितैः
सुगंधैर्वा विचक्षणः॥ धूमेन अगुर्वादिधूपेन॥ अपोह्य कफं दूरीकृत्य॥ पूगैः क्रमुकैः सुमनः

फलैः जातीफलैः एलाहरीतक्यादिफलैः॥ रतिस्तृप्तो स्थिते क्षाते भुक्ते वांते च संगरे॥ सभायां विदुषां राज्ञां कुर्यात्तांबूलचर्वणं॥ तांबूलमुक्तं तीक्ष्णोष्णं रोचनं तुवरं सरं॥ तिक्तं क्षारोषणं कामरक्तपित्तकरं लघु॥ बल्यं श्लेष्मास्यदोर्गंधमलवातश्रमापहं॥ मुखवैशद्यसौगंध्यकांतिसौष्ठवकारकं॥ हनुदंतमलध्वंसी जिह्वेंद्रियविशोधनं॥ प्रसवप्रसेकशमनं गलामयविनाशनं॥ नवं तदेव मधुरं कषायानुरसं गुरु॥ बलाशजननं प्रायः पत्रशाकगुणैः स्मृतं॥ वंगदेशोद्भवे पर्णं परं कटुरसं सरं॥ पाचनं पित्तजननं कमु ... कफहरं मतम्॥ पर्णीपुराणमकटु तुल्लकं ननु पांडुरं॥ विशेषात्कुणव ... मन्यद्धीनगुणं स्मृतं॥ पूगं गुरु हिमं रूक्षं कषायं कफपित्तनुत्॥ मोहनं दीपनं रुच्यमास्यवैरस्यनाशनं॥ पूगं स्यात् हृद्यमध्यं यत्त्विन्नं चापि त्रिदोषनुत्॥ सरसं गुर्वभिष्यंदि तद्धृशं वह्निनाशनं॥ खादिरं कफपित्तघ्नं सौमनस्यं करोति च॥ मुखवैशद्यसौगंध्यकांतिसौष्ठवकारकं॥ आयुर्ग्रे

चूर्णं वातबलासजित् संयोगतस्त्रिदोषघ्नं ४२

यशोमूले लक्ष्मीर्मध्ये तु व्यवस्थिता ॥ तस्मादग्रं च मूलं च मध्यं पर्णस्य वर्जयेत् ॥ पर्णमूले भवे
द्व्याधिः पर्णाग्रे पापसंभवः ॥ पर्णचूर्णं हरत्यायुः शिराबुद्धिविनाशिनी ॥ आद्यं विषोप
मं पीतं द्वितीयं भेदि दुर्जरं ॥ तृतीयादि तु पातव्यं सुधातुल्यं रसायनं ॥ तांबूलं नातिसे
वेत विरिक्तः क्षुभुक्षितः ॥ देहदृक्केशदंताग्निश्रोत्रवर्णबलक्षयः ॥ शोषः पित्तानि
लास्रं स्याद् अतितांबूलभक्षणात् ॥ तांबूलेन हितं दंतदुर्बले तृणरोगिणां ॥ विषमूर्छा
मदार्तानां क्षयिणां रक्तपित्तिनाम् ॥ भुक्त्वा शतपदं गच्छेच्छनैस्तेन तु जायते ॥ अन्नसं
घातशैथिल्यं ग्रीवाजानुकटीसुखं ॥ भुक्तोपविशतस्तंद्रा शयानस्य तु पुष्टता ॥
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः ॥ चंक्रममाणस्य पादशतं शनैर्गच्छतः ॥
दिशायामनलो नाभेरूर्ध्वेस्ति जंतूनां तस्मात्तु वामपार्श्वे शयीत भुक्तप्रपाकार्थम् ॥
त्रिदोषशमनी खट्वा तूली वातकफापहा ॥ भूशय्या बृंहणी वृष्या काष्ठपट्टी तु वात
ला ॥ अन्यः पुनराह ॥ भूशय्या वातलातीव रूक्षा पित्तास्रनाशिनी सुखशय्या शयनं

आमानद्यौ समुत्तानस्तानत्रिधिः पार्श्वे तु दक्षिणे तत
नाद्विगुणान्मोसे य आत्स्वप्यात्सुप्यात्सुखस्वाम ४२

विपरीतमतोन्यथा सम्वाहनं मांसरक्तत्वक्प्रसादकरं

परम् श्री तिनिद्रा. करं रुष्यं X 2

हृद्यं उष्णितनिद्राधृतिप्रदं॥ श्रमानिलहरं रुष्यं कफवातश्रमापहं॥ प्रवाते रौक्ष्यवैवर्ण्यस्तं
भकृद्दाहपित्तनुत्॥ स्वेदमूर्छापिपासघ्नमप्रवातमतोन्यथा॥ सुखप्रवातं सेवेत ग्रीष्मे
शरदि चान्तरा निर्वातमायुषे सेव्यमारोग्याय च सर्वदा॥ पूर्वोऽनिलो गुरुः सोष्णः स्नि
ग्धः पित्तास्रदूषकः विदाही वातलः श्रांतकफशोषवतां हितः स्वादुः पटुरभिस्यंदी त्वग
दोषार्शोविषकृमीन्॥ सन्निपातज्वरश्वासमामवातं प्रकोपयेत्॥ स्वादुर्मंदद्रव्येषु वा हि
स्येन मधुररसजनकः॥ दक्षिणः पवनः स्वादुः पित्तरक्तहरो लघुः वीर्येण शीतलो बल्यश्च
क्षुष्यो न तु वातलः॥ पश्चिमः पवनस्तीक्ष्णः शोषणो बलहृल्लघुः॥ मेदःपित्तकफध्वंसी प्र
भंजनविवर्द्धनः॥ उत्तरो मारुतः शीतः स्निग्धो दोषप्रकोपकृत्॥ क्लेदनः प्रकृतिस्थानं ब
लदो मधुरो मृदुः॥ दोषप्रकोपकृत् आतुराणां॥ आग्नेयो दाहकृद्रूक्षो नैरृतो न विदाह
कृत्॥ वायव्यस्तु भवेत्तिक्त ऐशान्यः कटुकः स्मृतः॥ विश्वग्वायुरनायुष्यः प्राणिनां बहुरो
गकृत्॥ अतस्तं नैव सेवेत सेवितः स्यान्न शर्मणे॥ व्यजनस्यानिलो दाहस्वेदमूर्छा

62

भ्र॰

श्रमापहः॥ तालवृन्तभवो वातस्त्रिदोषशमको मतः॥ वंशव्यजनजस्तूष्णो रक्तपित्तप्रकोपनः॥ चामरीवस्त्रसंभूतो मायूरो वेत्रजस्तथा॥ एते दोषजिता वाताः स्निग्धाश्च पूजिताः॥ कौश्यपात्रमयो वातः सोष्णो वा तस्य शान्तिकृत्॥ दाहश्रमघ्नः स्वेदघ्नो निद्रासौख्यकरो रणः॥ दिवास्वापं न कुर्वीत यतोऽसौ स्यात्कफावहः॥ ग्रीष्मवर्जेषु कालेषु दिवास्वप्नो निषिध्यते॥ ग्रीष्मे तु हि दिवास्वप्नो नित्यं येषां शरीरिणाम्॥ वातादयः प्रकुप्यन्ति तेषामस्वपतां दिवा॥ व्यायामप्रमदाध्ववाहनरतक्लान्ताननतीसारिणः॥ शूलश्वासवतस्तृषापरिगतान्हिक्कामरुत्पीडितान्॥ क्षीणान्क्षीणकफान्शिशून्मदहतान्वृद्धान्रसाजीर्णिनो रात्रौ जागरितान्निराशनान्कामं दिवा स्वापयेत्॥ दिवा वा यदि वा रात्रौ निद्रा सात्मीकृता तु यैः न तेषां स्वपतां दोषा जाग्रतां चोपजायते॥ स्वपतां दिवा॥ जाग्रतां रात्रौ॥ भोजनानन्तरं निद्रा वातं हरति पित्तकृत्॥ कफं

करोतिवपुषः पुष्टिं सौख्यं तनोति हि ॥ शयने पित्तनाशाय वातनाशाय मर्दने ॥ व
मने कफनाशाय ज्वरनाशाय लंघने ॥ आसीनघूर्णिते यत्तु नाभिष्यंदिनरूत्तणं
अथ अपरान्नमुदरेऽन्नस्य संस्थापनहेतूनाह ॥ शब्दस्पर्शौ च रूपाणि रसानो धा
२ मनः प्रियां ॥ भक्तवानपि सेवेत तेनान्नं साधु तिष्ठति ॥ उदरे इति शेषः ॥ अन्नस्योदरे
स्थितिहेतूनाह ॥ शब्दस्पर्शौ तथा रूपं रसो गंधो जगुप्सितः ॥ भक्तमप्रयतस्मान्नम
तिहासं च वा मथेत् ॥ अप्रयतमपवित्रं ॥ अन्यदपि वर्जनीयमाह ॥ शयने वाशने वा
पि न भजेन्न द्रवाधिकं ॥ नाग्न्यातपौ न प्लवनं न याने नापि वाहनं ॥ प्लवनं बाहुभ्यां
जलप्रसरणं ॥ यानं मार्गे चलनं ॥ वाहनं अश्वादि ॥ व्यायामं च व्यवायं च धावनं पानमे
व च ॥ युद्धं गीतं च पाठं च मुहूर्तं भक्तवान्स्त्यजेत् ॥ परिवर्जनार्थमजीर्णस्य हेतूनाह ॥
अत्यंबुपानाद्विषमाशनाच्च संधारणात्स्वप्नविपर्ययाच्च ॥ कालेपि सात्म्यं लघु चापि

संधारणात् ॥ अधो वातमलमूत्रादीनाम् ॥ अध्य
शनं वर्जयेत्याह ॥ अजीर्णे भुज्यते यत्तु तदध्यशन
मुच्यते ×२

भुक्तमन्नं न पाकं भजते नरस्य ॥ ईर्षाभयक्रोधसमन्विते न लुब्धेन रुग्दैन्यनिपीडितेन
विद्वेषयुक्तेन च सेव्यमानमन्नं न सम्यक् परिपाकमेति ॥ तन्निवारयन्नाह ॥ प्राग्भुक्ते
चानले मंदे द्विरन्हो न समाचरेत् ॥ अस्यायमर्थः प्रातर्भुक्ते ऽजीर्णे सति अन्हि एव पुन
र्न भुंजीतेत्यर्थः रात्रौ पुनस्तया पि सति भुंजीते वा ॥ यत आह सुश्रुत एव ॥ प्रातराशे
त्वजीर्णे तु सायमाशो न दुष्यतीति ॥ पूर्वभुक्ते विदग्धे ऽन्ने भोजनो हंति पावकम् ॥ अ व
स्यायमर्थः पूर्वभुक्ते पूर्वरात्रिभुक्ते अन्ने विदग्धे किंचित्पक्वे किंचिदपक्वे प्रातर्भोज
नः पावकं हंतीत्यर्थः ॥ यत आह ॥ सायमाशे त्वजीर्णे तु प्रातर्भुक्तं विषोपममिति ॥ सा
यमाशाजीर्णे भोजनोपायमाह ॥ अवेद्यदि प्रातरजीर्णशंका तदाभयां नागरसैंधवाभ्यां
म् ॥ विचूर्णितामशीत जलेन सत्का भुंजीत चान्नं मितमन्नकाले ॥ आयुः क्षयभयाद्विद्वा
न्नाहि सेवेत कामिनीम् ॥ अवशो यदि सेवेत तदा ग्रीष्मवसंतयोः ॥ अवशः अजितेंद्रि

65

यः॥आस्याच्चर्णकफस्थौल्यसौकुमार्य्यसुखप्रदाः॥अध्वाच्चर्णकफस्थौल्यसौकुमार्य्यवि
नाशनः॥यत्तुचंक्रमणंनातिदेहपीडाकरंभवेत्॥तदायुर्वलमेधाग्निप्रदमिंद्रियवोध
नम्॥उष्णीषंकान्तिकृत्केश्यंरजोवातकफापहं॥लघुतच्छस्यतेयस्माद्गुरुपित्ताक्षिरोगकृत्
उपानध्धारणंनेत्र्यमायुष्यंपादरोगहृत्॥सुखप्रचारमोजस्यंवृष्यंचपरिकीर्तितं॥पादा
भ्यामनुपानद्भ्यांसदाचंक्रमणंनृणां॥अनारोग्यमनायुष्यमिंद्रियघ्नमदृष्टिदं॥छत्र
स्यधारणंवर्षातपवातरजोऽपहं॥हिमघ्नंतिमिरघ्नंचमंगल्यमपिकीर्तितं॥सत्वोत्सा
हवलस्थैर्य्यधैर्य्यतेजोविवर्द्धनं॥अवष्टंभकरंचापिभयघ्नंदंडधारणं॥ऊर्द्ध्वोछादन
संयुक्ताशिविकासर्ववल्लभा॥तस्यामारोहणंनृणांत्रिदोषशमकंमतं॥वातश्लेष्मग
दार्तानामहिताश्रमकृत्तरिः॥पित्तानिलकरोहस्तीलक्ष्म्यायुःपुष्टिवर्द्धनः॥घोटकारोह
णंवातपित्ताग्निश्रमकृन्मतम्॥मेदोवर्णकफघ्नंचहितंनदुलिनःपरं॥आतपःस्वेद

मूर्धास्य पित्तल श्चात्क मश्रमान्॥ दाहं विवर्णतां कुर्यादेतान्छायाव्यपोहति॥ रात्रिर्वैष्या
दिमावल्यानिद्रालस्यविधायिनी॥ भयावहा मोहकरी कुरुते कफवातला कुरुते कुहेस
इति लोके॥ अग्निर्वातकफस्तंभः शीतवेपथुनाशनः॥ आमाभिष्यंदशमनो रक्तपित्तप्रकोप
नः सद्यः श्लेष्मकरो धूमो नेत्रयो रहितो भृशं॥ शिरोगौरवकृज्ज्ञापि वातं पित्तं प्रकोपयेत्
॥ अथाचारः॥ मैत्रीं सद्भिः समं कुर्यात्स्नेहं सत्सु तु सर्वदा॥ संसर्गं साधुभिः कुर्यादसत्संगं
परित्यजेत्॥ सत्सु सर्वथा॰ सज्जनेषु मनोवाक्कायकर्मभिः॥ सेवेत देवभूदेववृद्धवैद्य
नृपातिथीन्॥ विमुखान्नार्थिनः कुर्यान्नावमन्येत कानपि॥ गुरूणां सन्निधौ तिष्ठेत्सदे
व विनयान्वितः पादप्रसारणादीनि तत्र नैव समाचरेत्॥ अपकारपरेऽपि स्यादुपका
रपरः पुमान्॥ आत्मवत्सकलान्पश्येद्वैरिणोऽहू रतो वसेत् न कंचिदात्मनः शत्रुं ना
त्मानं कस्यचिद्रिपुं॥ प्रकाशयेन्नापमानं नच निःस्नेहतां प्रभोः नात्मानमुदके पश्येन्न

नग्नःप्रविशेज्जले॥तथानातातगांभीर्य्येनहिंस्रप्राणिव सेवितं॥कालेहितंमितंसत्यंसंवादेम
धुरंवदेत्॥भुंजीतमधुरप्रायंस्निग्धंकालेहितंमतं॥नरात्रौदधिभुंजीतनचनिर्लवणं
तथा॥नामुद्गसूपंनाक्षौद्रंनचाप्युष्णंनशार्करं॥जनस्याशयमालक्ष्ययोययथापरितुष्य
ति॥तंतथैवानुवर्त्तेतपराराधनपंडितः॥नैकःसुखीनसर्वत्रविश्वस्तोनचशंकितः॥नो
द्यमाद्विरमेत्क्वापिहितावीर्यैस्तुफलेनतु॥हितो फलहितो॥उद्यमेफलेधनादे॥वेगेनधा
रयेज्ञातुमनोवेगान्विधारयेत्॥नपीडयेदिंद्रियाणिनचैतान्यतिलालयेत्॥वर्षा
तपादिषुछत्रीदंडीराम्रटवीषुच॥सोपानत्कस्तुंरत्न्निचरेद्युगमात्रदृक्॥युगमा
त्रदृक्॥अग्रतोहस्तचतुष्टयमितांभूमिंपश्यन्॥नदीतरेन्नबाहुभ्यांनाग्निस्कंधमभिव्र ध
जेत्॥संदिग्धनावंवृक्षंचनारोहेद्दुष्टयानवत्॥दुष्टयानंदुष्टगजघोटकादि॥नासंवृ
तमुखंकुर्यात्समायांचविचक्षणः॥कासंहास्यंक्षयोज्जारंनजेएंद्रवंस्तुतथा॥नासि
में

कोनविकुक्षीयान्नासीनोत्कटकं क्वचित्॥ नोद्धंजानुश्चिरंतिष्ठेन्न नखेन लिखेद्भुवम्
संमार्जनीरजो नैव देहे दद्यात्कदाचन॥ न नखेन तृणं छिंद्यान्नोच्छिष्टो ब्राह्मणं स्पृशेत्
नोपरक्तं न चोद्यंतं नास्तं यांतं दिवाकरं॥ सर्वथा न समीक्षेत न जले प्रतिबिंबितं॥ ने
क्षेत सततं सूक्ष्मदीप्तामेध्याप्रियाणि च॥ घोरं दरं धनुर्नैव दर्शयेत्कमपि क्वचित्॥
नेच्छेद्बलवतायुद्धं न मारं शिरसा वहेत्॥ गात्रं न वादयेत्केशान्हस्तेन धुनुयान्न च॥
न गच्छेत्तृज्ययोर्मध्ये दंपत्योरंतरे न च॥ रिपोरन्नं न भुंजीत गणिकान्नमपि क्वचित्॥ प्र
तिभूर्न भवेत्क्वापि न च साक्षी वृथा भवेत्। स्यंगीं न धारयेज्जातु हूतेहूरात्परैँत्। विश्वासं त्यजे
नाचरेत्स्त्रीणां नाःस्वतंत्रांश्च नाचरेत्॥ रक्षणीयाः सदा यत्नाद्यौवने तु विशेषतः॥
न भिन्ने शयने सुप्यान्नानेकविवरेपि च॥ नैको देवालये नैव रात्रौ तरुतले स्वपेत्॥ एवं
दिनानि गमयेत्सदाचारपरः पुमान्॥ ततो रात्रिप्रयुक्तानि कुर्यात्कर्माणि मानवः ८

त्याचारं समासेन भाषितं यः समाचरेत्॥ स विंदत्यायुरारोग्यं प्रीतिं धर्मं धनं यशः॥
॥अथ संध्यायां निषिद्धानि कर्माण्याह॥ एतानि पंच कर्माणि संध्यायां वर्जयेद्बुधः॥ आहा
रं मैथुनं निद्रां पाठं गतिमध्वनि॥ भोजनाज्जायते व्याधिर्मैथुनाद्गर्भवैकृतिः॥ निद्रायां निः
स्वता पाठादायुर्हानिर्मते ध्रुवं॥ अथ रात्रिचर्यामाह॥ ज्योत्स्नाशीतास्मरानंदप्रदात्तृपि
त्तदाहनुत्॥ ततो हीनगुणाः कुर्याद्दवस्यायोऽनिलकफं॥ तमो भयावहं मोहदिङ्मोहज
नकं भवेत्॥ पित्तहृत्कफं कामवर्द्धनं श्रमकृद्धृतं॥ अव्यवायान्मेहमेदोवृद्धिःशिथि॥
रात्रौ च भोजनं कुर्यात्त्रयमप्रहरांतरे॥ किंचिद्धीनं समश्नीयाद्दुर्जरं तत्र वर्जयेत्॥ शरी
रे जायते नित्यं देहिनः सुरतं सुखं॥ अव्यवायान्मेहमेदोवृद्धिः शिथिलतातनोः
बालेति गीयते नारी यावद्वर्षाणि षोडश॥ ततस्तु तरुणी ज्ञेया द्वात्रिंशद्वत्सरा
त्सरावधिः तदूर्द्धमधिरूढा स्यात्पंचाशद्वत्सरावधिः वृद्धा तत्परतो ज्ञेया सुरतो
त्सववर्जिता॥ अधिरूढा प्रौढा॥ निदाघशरदोर्बाला हिता विषयिणो मता

कृत्

७०

६

ना॥ तरुणी शीतसमये प्रौढा वर्षावसंतयोः नित्यं बाला सेव्यमाना नित्यं वर्द्धय
ते बलं॥ तरुणी ह्रासयेच्छक्तिं प्रौढा ह्यावयते जरां॥ सद्यो मांसं नवं चान्नं बाला
स्त्री क्षीरभोजनं॥ घृतमुष्णोदकस्नानं सद्यः प्राणकराणि षट्॥ पूतिमांसं स्त्रियो वृ
द्धा बालार्कस्तरुणं दधि॥ प्रभाते मैथुनं निद्रा सद्यः प्राणहराणि षट्॥ प्राणशब्दो
ऽत्र बलवाचकः बालार्कः कन्यार्कः वृद्धोपि तरुणीं गत्वा तरुणत्वमवाप्नुयात्॥ व
योधिकां स्त्रियं गत्वा तरुणः स्थविरायते॥ प्रायुष्मंतो मंदजरा वपुर्वर्णबलान्वि
ताः स्थिरोपचितमांसाश्च भवंते स्त्रीषु संयुताः सेवेत कामतः कामं बलाद्वाजीकृ
तो हिमे॥ प्रकामं तु निषेवेत मैथुनं शिशिरागमे॥ त्र्यहाद्वसंतशरदोः पक्षाद्वृष्टिनि
दाघयोः सम्भुतस्तु॥ त्रिभिस्त्रिभिरहोभिस्तु समेयात्प्रमदां नरः॥ सर्वेष्वृतुषु घर्मे
षु पक्षात्पक्षाद्व्रजेद्बुधः समेयात् समागच्छेत्॥ घर्मे ग्रीष्मे॥ शीते रात्रौ दिवा ग्रीष्मे

71

न

वसंतेतुदिवानिशि॥ वर्षासुवारिदध्वांतेशरत्सुसरसःस्रुतः। उपेयात्सुरूपोनारींसं
ध्यायोर्नवपर्वसु॥ गोसर्गेवार्द्धरात्रेचतथामध्यदिनेपिच॥ विहारंभार्ययाकुर्यादृष्टेऽ
तिप्रायसंवृते॥ रम्येषुच्यागनागारेसुगंधिसुखमारुते॥ देशेगुरुजनासन्नेविवृतेति
त्रपाकरे॥ श्रूयमाणव्यथारुतुवचनैनरमेतना॥ स्नातश्चंदनलिप्तांगःसुगंधसमनो
न्वितः॥ भुक्तवृष्याःसुवसनःसुवेषःसमलंकृतः॥ तांबूलवदनोरक्तोमनुरक्तोधिक
स्मरः॥ पुत्रार्थीपुरुषोनारीमुपेयाच्छयनेशुभे॥ प्रतापितोधृतिःक्षुद्वान्सव्यथांगः
पिपासितः॥ बालोवृद्धोन्यवेगार्तस्त्यजेद्रोगीचमैथुनं॥ रोगीमैथुनसंवर्द्धनीयरो
गयुक्तः॥ भार्यारूपगुणोपेतांतुल्यशीलांकुलोद्भवां॥ प्रमिकामोऽभिकामांतुहृष्टोहृ
ष्टामलंकृतां॥ सेवेतप्रमदांयुक्त्यावाजीकरणबृंहितः॥ रजस्वलामकामांचमलिना
मप्रियांतथा॥ वर्णवृद्धांवयोवृद्धांतथाव्याधिप्रपीडितां॥ हीनांगींगर्भिणींद्वि
ष्यांयोनिरोगसमन्वितां॥ सगोत्रांगुरुपत्नींचतथाप्रव्रजितामपि॥ नाभिगच्छे

तुमा न्नारीं भूरि वैगुण्यपशंकया॥ रजस्वलां गतवतो नरस्यासंयतात्मनः॥ दृष्ट्यायु
स्तेजसां हानिरधर्मश्च ततो भवेत्॥ लिंगिनीं गुरुपत्नीं च सगोत्रामथपर्वसु॥ वृद्धां च
संध्ययोश्चापि गच्छतो जीवनक्षयः॥ लिंगिनी प्रव्रजिताम्॥ गर्भिण्या गर्भपीडास्याद्बा
धितायां बलक्षयः॥ रोगिणीं मलिनां द्वेष्यां तामोवंध्यां मसे वृत्ते॥ देशेभिगच्छतो रेतः
क्षीणं स्थानं यतो भवेत्॥ गर्भिणी गर्भवासदिवसात् द्वितीये मासि गर्भस्थितेरनिश्च
ये यथोक्त नक्षत्रादिलाभाभावे वा तृतीये मासि पुंसवने कृते नाभिगच्छेत्॥ यतः पुंस
वनानंतरमाहत्याम(?)ः॥ न त्यजेन्नदीतीरे देवखातोदकं तथा॥ भर्तुः शय्यां मृताप
त्यां तथैवामिषभोजनम्॥ श्रवर्तु॥ आमिषस्याशनं यत्नात्प्रमदापरिवर्जयेत्॥
देवारामनदीयानं प्रयोगं पुरुषस्य चेति॥ क्षुधितः क्षुच्चित्त म मध्याहेत्स्थितो
बलः॥ स्थितस्य हानिः शुक्रस्य वायोः कोपं वदंति॥ व्याधितस्य रुजा क्षीणाम्

घ्रीमतश्च प्रजायते॥ प्रत्यूषे चार्द्धरात्रे च वातपित्ते प्रकुप्यतः॥ तिर्यग्योनावयोनौ वा
दुष्टयोनौ तथैव च॥ उपदेशस्तथा वायोः कोपः शुक्र सुखक्षयः॥ उच्चारिते मूत्रे
ते च रेतस्च विधारणे॥ उत्तानेव भवेच्छीघ्रं शुक्राश्मर्यास्तु संभवः सर्वमेतत्प्रजे
तस्माद्यत्नो लोकद्वयाहितम्॥ शुक्रं तूपस्थितं मोहान्न संधार्यं कदाचन॥ स्नाने समशर्क
रं क्षीरं भक्ष्यमेतत्व संस्कृतम्॥ वातो मांसरसः स्वप्नः सुरूत्तां ते हिताश्रमी॥ स्थूलकास
ज्वरश्वासपाण्डुव्यायामपरिच्युताः अतिव्यवायाज्जायन्ते रोगाश्चाक्षेपकादयः॥ रात्रौ जा
गरणं रूक्षं कफदोषविषार्त्तिजित्॥ निद्रातु सेविता काले धातुसाम्यमतन्द्रिता॥ पुष्टि
वर्णं बलोत्साहं वह्निदीप्तिं करोति हि॥ पोलोदिशयनसमये मधुमिश्रं वीजपूरद
लं चूर्णं॥ सं तु लक्ष्मीकर वातप्रसरनिरोधात्सुखे स्वपिति॥ सवितुः समुदयकाले
प्रसृतीः सलिलस्य यः पिवेदष्टौ॥ रोगजरापरिमुक्तो जीवेद्वत्सरशतं साग्रं॥ प्रस्व

जलपानस्योक्तमकालः॥ रात्रेश्चतुर्थप्रहरप्रवेशः तयाचभोजः॥ पिबतिपर्युषि
तंजलमन्वहंतिमिरिणीचरमप्रहरेपदीति एतज्जलपानकालमर्यादासूर्योदया
तिसन्निहितप्राक्कालः॥ तथाचतत्रांतरे॥ प्रभसः प्रसृतीरष्टौरवावनुदितेपिबेत
वातपित्तकफान्जित्वाजीवेद्वर्षशतंसुखी॥ इति॥ सलिलस्यात्रपर्युषितस्यग्रह
णंभोजवचनानुरोधात्॥ अर्शःशोथग्रहिण्याज्वरजठरजराकुष्टमेदोविकाराम्
त्राघातास्रपित्तश्रवणगलशिरःश्रोणिशूलादिरोगाः॥ येवान्येवातपित्तक्षतज
कफकृताव्याधयःसंतिजंतोस्तांस्तानभ्यासयोगादपहरतिपयःपीतमंतेनिशायाः
विगतघननिशीथेप्रातरुत्थायनित्यंपिबतिखलुनरोयोघ्राणरंध्रेणवारि॥ स
भवतिमतिपूर्णश्चक्षुषातार्क्ष्यतुल्योवलिपलितविहीनःसर्वरोगैर्विमुक्तः घन
निशीथोऽत्रनिशांधकारः पातव्यंनासयानीरंप्रसृतित्रयमात्रया॥ कंगवली

पलितघ्नंपीनवेस्वर्यंकासशोषहरं॥रजनीदर्येवुनस्यंरसायनंदृष्टिसंजननम्॥
स्नेहपीतेत्वतेशुद्धावाध्मानेत्तिमिन्नोदरे॥हिक्कायांकफवातोत्थेव्याधोतद्धारिवारये
त्॥तद्धारिनासापेयम्॥अथऋतुचर्या॥चयकोपप्रशमायस्मिन्दोषाणांसंभवंतिहि
ऋतुषट्कंतदाख्यातंरवेराशिषुसंक्रमात्॥ग्रीष्मेमेषवृषौप्रोक्तौप्रावृट्मिथुनक
र्कयोः॥सिंहकन्येस्मृतावर्षास्तुलावृश्चिकयोःशरत्॥धनुर्ग्राहौचहेमंतोवसंतःकुंभ
मीनयोः॥मेषवृषोरविणाक्रांतौ॥एवंमिथुनकर्कटावित्यादि॥अन्येतु॥शि
शिरःपुष्पसमयोग्रीष्मोवर्षाशरद्धिमाःमाघादिमासयुग्मैःस्युऋतवःषट्क्रमा
दमी॥गंगायादक्षिणेदेशेवृष्टेर्बहुलभावतः॥उभौमुनिभिराख्यातौप्रावृड्वर्षा
भिधावृत्॥अहोंशाःप्रथमोवसंतसमयोमध्योनिदाघस्तया॥यःशेषःखलु
तस्यसोत्रसमयोहेमंतसंज्ञस्ततः॥यामिन्याःप्रथमस्तुयःसशिशिरोमध्यस्त्वत

स्यांशरत्॥ तच्छेषस्तु मुनीश्वरैरभिहितः कालो हि वर्षाभिधः उत्तरायणमाघाद्यैः परैः स्याद्दक्षिणायनम्॥ आद्यमुष्णं बलहरं ततोन्यद्बलदं हि मम्॥ हेमंतः शीतलः स्निग्धः स्वादुर्जठरवह्निकृत॥ शिशिरः शीतलोतीव रूक्षो वा ताग्निवर्द्धनः हेमंतः स्वादुः प्रायेण द्रव्येषु स्वादुरसजनकः एवमन्यत्रापि बोद्धव्यम्॥ वसंतो मधुरः स्निग्धः श्लेष्मवृद्धिकरश्च सः॥ ग्रीष्मो रूक्षोति कटुकः पित्तकृत्कफनाशनः वर्षाशीता विदाहिन्यो वह्निमांद्यानिलप्रदाः॥ शरदुष्णं पित्तकर्त्री नृणां मध्यबला वहा॥ चयप्रकोपोपशमा वायोर्ग्रीष्मादिषु त्रिषु॥ वर्षादिषु पित्तस्य श्लेष्मणः शिशिरादिषु चीयते लघुरूक्षाभिरोषधीभिः समीरणः॥ तद्विधस्तद्विधे देहे कालस्योष्म्यान्न कुप्यति॥ तद्विधो रूक्षो लघुश्च॥ तद्विधे रूक्षे लघो च॥ अद्भिरम्लविपाकाभिरोषधीभिश्च तादृशं॥ पित्तं याति चयं कोपं न तु कालस्य शैत्यतः ता

दृष्टं त्वम्लविपाकं॥ चीयते स्निग्धशीताभिरुदकौषधिभिः कफः तुल्येच काले देहेच
स्निग्धत्वान्न प्रकुप्यति॥ तुल्येकाले स्निग्धेशीतलेच॥ देहे स्निग्धत्वात्॥ हिमे यातिश
मं पित्तं प्रायः श्लेष्मा च चीयते॥ स वायुः शिशिरे कोपं यात्येवोपहतः कफः हेमंते संचि
तः श्लेष्मा शिशिरेत्वभिचीयते॥ शीतस्निग्धगुरुद्रव्यैरोद्यात् स्निग्धो न कुप्यति॥ स्नि
ग्धः कठिनीभूतः॥ इति कालस्वभावोऽयमाहारादिवशात्पुनः चयादीन्यांति स
द्योपि दोषाः काले विशेषतः॥ चयकोपशमान्दोषा विहाराहारसेवनैः॥ समानैर्यां
त्यकालेपि विपरीतैर्विपर्ययम्॥ समानैः तुल्यैः चयादियोगं यांतीति यावत्॥ विपर्य
यं कालेपि वैपरीत्यं वा ध्रुवम्॥ चयलक्षणमाह सुश्रुतः॥ स्वस्थानस्थस्य दोषस्य वृद्धिः
स्यात्स्तब्धकोष्ठता॥ पीतावभासिता वह्निमंदता चांगगौरवम्॥ आलस्यं चयहे
तुस्तु द्वेषश्च चयलक्षणं॥ संचये पहृता दोषा लभंते नोत्तरागतिं॥ ते तूत्तरासु ग
तिषु भवंति बलवत्तराः वर्षासु प्रबलो वायुस्तस्मान्निशादय. स्त्रयः रसाः सेव्या वि

शेषेण पवनस्योपशांतये ॥ मिष्टादयस्त्रयः मधुराम्ललवणाः भवेद्वर्षासु वपुषः स्नि
ग्धत्वं यद्विशेषतः ॥ तत्केशशांतये सेव्या अपि कट्वादयस्त्रयः ॥ कट्वादयस्त्रयः कटुति
क्तकषायकाः स्वेदनं मर्दनं सेव्यं दध्युष्णं जांगलामिषम् ॥ गोधूमाः शालयो माषा
जले कौपं न भक्ष्युतं ॥ न भजेत्पूर्वपवनं वृष्टिं घर्मं हिमं श्रमं ॥ नदीनीरं दिवास्वप्नं
रूक्षं नित्यं च मैथुनम् ॥ सर्पिः स्वादुकषायतिक्तकरसाय च शीतलं यल्लघु क्षीरं स्वच्छ
सितेतवः ॥ पटुरसः स्वल्पः पलं जांगलं ॥ गोधूमा अपि मुद्गशालिसहिता नादेयमं
भ्रदके चंद्रस्पंदनमिंदुरादि रजनो माल्यं पटो निर्मलः ॥ विश्रामः सुहृदां गणेषु स
मधुरा वाचः सरंक्रीडनं पित्तानो च विरेचनं वलवतो युक्तं शिरामोक्षणं ॥ एतान्यत्र
घनावसानसमये पथ्यानि मुंचेद्बुधि व्यायामान्नकट्वौ घ्मतीक्ष्णादिवसस्वप्नं हि
मे चात्रपं ॥ अथ शरदऋतुचर्यामाह ॥ दिवसेर्ककरैर्जुष्टं निशि शीतकरांशुभिः स्नेयम

म्लहकंनामस्निग्धंदोषत्रयापहम्॥अत्राह्निवसपदंदिवापादद्वयेनिशायादिच॥चंद्रः
कर्पूरःस्तवःशाल्लयोमुद्गासरोऽम्भःकथितंपयः॥शारद्येतानिपथ्यानिप्रदोषेचं
द्ररश्मयः॥स्नानभोजनमम्लमिष्टलवणान्नमभ्यंगबमे अम्लमानधूपेतवशालिमा
षपिष्टान्नपिष्टनवान्नतिलान्॥कस्तूरींवरकुंकुमागुरुयुतामुष्णांबुशौचंतथास्निग्धं
स्त्रीषुसुखंगुरुसूक्ष्मवसनंसेवेतहेमंतके॥शिशिरेशीतमधिकंरौक्ष्यंचादानकालजम्
विशेषतस्तमात्रत्रहेमंतस्यमतोविधिः॥वांतिंनस्यमथाभयांचमधुनाव्यायामम्
द्वर्तनंससेवेतमधोकफघ्नकवलंशाल्यंपलंजांगलं॥गोधूमान्वहुमेदशालिसहिता
२ न्मुद्गान्यवान्षाष्टिकांलेपंचंदनकुंकुमागुरुकृतंरूतंकटुस्नेहंलघु॥मिष्टमम्लंदधि
स्निग्धंदिवास्वप्नंवहुजेरम्॥अवश्यायमपिप्राज्ञोवसंतेपरिवर्जयेत्॥स्वादुस्निग्ध
हिमंलघुद्रवमयंद्रव्यंरसालांसितां॥शक्तुंक्षीरघृतांबुजानिसितयाशालिंरसंमांस
जम्॥शीतांशुंशयनेदिवामलयजंशीतंपयःपानकंसेवेतोस्मदिनेत्यजेत्तुकटुकंक्षारा

ह्यत्र धर्मेष्वमान्॥ अनुष्ठेषु यएते स्तु विधिनिर्वर्तते नरः॥ दोषोऽन्न तु कृतान्येव लभते
सकदाचन॥ छ॥ इति श्रीलटकनतनयश्रीमन्मिश्रभावविरचिते भावप्रकाशे दि
नचर्यर्तुचर्याप्रकरणं चतुर्थं॥ ॥ अथ व्याधेर्लक्षणमुक्तं वाग्भटः॥ रोगस्तु दोष
वैषम्यं दोषसाम्यमरोगता॥ रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते॥ ते च स्वाभावि
काः केचित्केचिदागन्तवः स्मृताः मानसाः केचिदाख्याताः कथिताः केचित्कायिकाः त
त्र स्वाभाविकाः स्वभावादेव जाताः॥ क्षुत्पिपासा सुषुप्ता जरामृत्युप्रभृतयः॥ अथ
वा स्वभावादुत्पत्तेर्जाताः स्वाभाविकाः सहजा इत्यावत्॥ ते च जन्मांधत्वादयः आगं
तवोऽभिघातादिजनिताः अथवा जन्मोत्तरभाविनः॥ मानसाः कामक्रोधलोभ
मोहभयाभिमानदैन्यपैशुन्यविषादेर्ष्यासूयामात्सर्यप्रभृतयः अथवा उन्माद
पस्मारमूर्छाभ्रमतमःसंन्यासप्रभृतयः॥ कायिकाः पांडुरोगप्रभृतयः॥ कर्मजा

कथिताः केचिद्दोषजाः संति चापरे॥ कर्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः
स्मृताः॥ तत्र कर्मजा व्याधयः यस्मात्तं नेदुःकर्मप्रबलं केवलभोगनाश्यं प्राय
श्चित्तनाश्यं वा ततो जाताः न तु दुष्टवातादिदोषेण जनिताः तथा यथाशास्त्रं च
निर्णीतो यथा व्याधिश्चिकित्सितः न शमं याति यो व्याधिः स ज्ञेयः कर्मदोषजः॥
दोषजाः मिथ्याहारविहारप्रकुपितवातपित्तकफजाः ननु मिथ्याहारविहारा
णामपि प्राक्तनपुण्येन कृतेन नैकजन्मदृष्टपत्त एव ततो दोषजेष्वपि प्राक्तनं दुःकर्मै
व कारणं तत्कथं दोषजा इति उच्यंते॥ दोषजेष्वपि वस्तुतः प्रादिकारणं दुष्ट
मेव वर्त्ततएव किंतु तत्र मिथ्याहारविहारदूषिता दोषा हेतवो दृश्यंते इति दोष
न जा इत्युच्यंते इति समाधिः॥ कर्मदोषोद्भवाः स्वल्पदोषा गरीयांसस्ते ज्ञेयाः कर्म
दोषजाः प्रबकारणं दुष्कर्म प्रबलम्॥ यतो दोषास्त्वल्पेपि व्याधेर्गरीयस्त्व
तत्कर्मणस्तथा देवत्तीणं भवति॥ दोषाः स्वल्पा अपि निदानत्वेनोक्ता दृष्टपत्तए

83

वेत्ति॥ दोषाणां कारणतामन्यत इति॥ कर्मदोषोद्भवाः कर्म्मतयात्कर्म्मकृता दोष
जाः स्वस्वभेषजैः कर्मदोषोद्भवा यान्ति कर्मदोषतयात्क्षयं॥ दोषजाः स्वस्वभेष
जैरिति· दोषजेषा द्विकारणां दुष्कर्मतद्वेषजा यद्व्यक्तयादिजनितदुःखभोगेन
कष्टतित्कषायाघहघमत्तणादिजनित्तदुःखभोगे न च क्षयं यान्ति॥ दोषादुष्टा
हेतवो दोषास्ते स्वस्वभेषजैः क्षयं यान्तीत्यर्थः॥ साध्याया प्याश्चसाध्याश्च व्याधय
स्त्रिविधाः स्मृताः सुखसाध्यः कष्टसाध्यो द्विविधः साध्य उच्यते॥ याप्यलक्षणमा
ह॥ यापनीयं तु तं विद्यात्क्रिया धारयते हि यं॥ क्रिया यां तु निवृत्तायां सद्यो यश्च
विनश्यति॥ प्राप्ता क्रिया धारयति सुखिनां भयमातुरं॥ प्रपतिष्यदिवागारं स्तंभो
यत्नेन योजितः साध्या याप्यत्वमायान्ति याप्याश्चासाध्यतां तथा घ्नंति प्राणान्।
साध्यास्तु नराणामक्रियावतां॥ अक्रियावतां चिकित्सारहितानाम॥ अयो

84

पद्रवस्य लक्षणं ॥ रोगारंभकदोषस्य प्रकोपादुपजायते ॥ योन्यो विकारः सबुधै
रुपद्रवइतो दितः ॥ अथारिष्टस्य लक्षणमाह ॥ रोगिणो मरणं यस्माद वश्यंभावि
लक्ष्यते ॥ तल्लक्षणमरिष्टं स्यादृिष्टं चापितदुच्यते ॥ अथ चिकित्साया लक्षणमाह ॥
या क्रिया व्याधिहरणी सा चिकित्सा निगद्यते ॥ दोषधातुमलानां या साम्यकृत्सैव
रोगहृत् ॥ क्रियात्र कर्म ॰ व्याधिहन्यतेपयेति व्याधिहरणी ॰ करणाधिकरणयो
श्चेति ॥ सूत्रेणात्र करणार्थे युट तथा च ॥ याभिः क्रियाभिर्जायंते शरीरे धातवः समाः
सा क्रिया तद्विकाराणां कर्म तद्भिषजां मतं ॥ याम्युदीर्णं शमयति नान्यं व्याधिं करो
ति च ॥ सा क्रिया न तु या व्याधिं हरत्यन्यमुदीरयेत ॥ क्रिया च चिकित्सा ॥ तथा चम
रसिंहः ॥ आरंभो प्रतिस्कृतिः शिक्षा पूजनं संप्रधारणं ॥ उपायः कर्म चेष्टा च चिकि
त्सा करणं क्रिया इति ॥ अथ चिकित्साविध्युपदेशः ॥ जातमात्रश्चिकित्स्यः स्यान्नोपेक्ष्यो
ल्पतया गदः ॥ वह्निशत्रुविषैस्तुल्यः स्वल्पोपि विकरोत्यसौ रोगमादौ परीक्षेत ततो

०८५

वा॰

नेतरमौषधं॥ ततः कर्म भिषक् पश्चात् ज्ञानपूर्वं समाचरेत्॥ अयमर्थः॥ भिष
क् आदौ रोगं परीक्षेत विचारयेत्॥ ततोऽनंतरमौषधं विचारयेत्॥ ततः पश्चा
द्रोगौषधविचारानंतरं॥ ज्ञानपूर्वं सावधानेन तत्वविज्ञाय॰ कर्म चिकित्सामौष
धदानादिरूपं समाचरेदित्यर्थः रोगाज्ञाने चिकित्साकरणे दोषमाह॥ यस्तु रो
गमविज्ञाय कर्माण्यारभते भिषक्॥ अप्यौषधविज्ञानं तस्य सिद्धिर्यदृच्छ
या॥ यदृच्छया स्वैरितया सिद्धिर्भवति नापि भवतीत्यर्थः॥ अन्यच्च॥ भेषजं केव
लं कर्तुं यो जानाति न चामयं॥ वैद्यकर्म स चेत् कुर्याद्वधमर्हति राजतः॥ रोगज्ञा
ने भैषज्याज्ञाने दोषमाह॥ यस्तु केवलरोगज्ञो भेषजेष्वविचक्षणः॥ तं वैद्यं प्रा
प्य रोगी स्याद्यथा नौर्नाविकं विना॥ नाविकं कर्णधारं विना यथा नौः सेकटे
पतति तथा स रोगीत्यर्थः॥ अन्यच्च यस्तु केवलशास्त्रज्ञः क्रियास्वकुशलो भि

धा

षक् समुत्थस्यातुरं प्राप्ययातः पंगुरिवाहवे ॥ रोगौषधयो ज्ञाने गुणानाम् ॥ यस्तु
रोगविशेषज्ञः सर्वभैषज्यकोविदः ॥ देशकालविभागज्ञस्तस्य सिद्धिर्न संशयः ॥
आदावेते रुजां ज्ञाने प्रयतेत चिकित्सकः भेषजानां विधाने च ततः कुर्याच्चिकि
त्सितं ॥ चिकित्सितमित्यत्र भावे क्तः ॥ विकाराणामकुशलो न जिह्रीयात्कदाचन
न हि सर्वविकाराणां नामतोस्ति ध्रुवास्थितिः ॥ न जिह्रीयात् न लज्जेत ॥ ध्रुवा नियता
नास्ति रोगो विना दोषैर्यस्मात्तस्माच्चिकित्सकः ॥ अनुक्तमपि दोषाणां लिंगैर्व्या
धिमुपाचरेत् ॥ येन कुर्वत्यसाध्यानां चिकित्सां ते भिषग्वराः ॥ अतो वैद्यैः श्रमः
कार्यः साध्यासाध्यपरीक्षणे ॥ रोगज्ञानोपाया अग्रे वक्ष्यंते ॥ शीते शीतप्रतीका
रमुष्णे तूष्णनिवारणं ॥ कृत्वा कुर्यात्क्रियां प्राप्तां क्रियाकालं न हापयेत् ॥ अप्रा
प्ते वा क्रियाकाले प्राप्ते वा न क्रिया कृता ॥ क्रियाहीनातिरिक्ता च साध्येष्वपि न सिद्ध्य

84

ति॥ अथ मर्थः॥ काले चिकित्सावसरे॥ अप्राप्ते नागते या क्रिया चिकित्सा॥ यथा ज्वरे जीर्णता
म प्राप्ते तरुण एव कषायदानं क्रिया न सिध्यति॥ या च क्रिया चिकित्सावसरे प्राप्ते न कृता०
॥अर्थात्यश्चात्कृता यथा दाहे कथं चित्शांते पश्चाद्धीनतलानुलेपनादि क्रिया॥ तथा हीनाति
रिक्ता च साध्येष्वपि न सिध्यति ॥अतिरिक्ता हीना वा क्रिया वक्ष्यमाणा॥ विकारे ऽल्पे महत्कर्म
क्रिया लघ्वी गरीयसी द्वयमेतदकौशल्ययुक्तकर्म तथा क्रिया॥ क्रिया यास्तु गुणालाभे क्रि
यामन्यां प्रयोजयेत्॥ पूर्वस्यां शांतवेगायां न क्रियासंकरो हि॥ भिन्नरूपाभिस्तु क्रिया नः
न भिः सांकर्यमपि दोषाय॥ यतस्माह॥ क्रियाभिस्तुल्यरूपाभिर्न क्रियासंकरो हितः ताभि
स्तु भिन्नरूपाभिः सांकर्येनैव दुष्यति॥ अत्र पाठोक्तं॥ लंघनं वालुकास्वेदो नस्यं निष्ठीवनं
तथा॥ अवलेहांजने चापि प्राक् प्रयोज्यं त्रिदोषजे॥ ज्वर इति शेषः॥ न चैकांतेन निर्दिष्टे
शास्त्रे निविशते बुधः॥ स्वयमप्यत्र भिषजा तर्कनीयं चिकित्सितं॥ यतस्माह॥ उत्पद्य

प्रथ

तेचसा वस्यादोषका लवलेप्रतिः॥ यस्मांकार्यमकार्यं स्यात्कर्मकार्यं विवर्जितं॥ विवर्जितं
कर्मकर्तव्यं भवतीत्यर्थः॥ इति चिकित्सायाः फलमाह॥ क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्मः क्व
चिद्यशः॥ कर्माभ्यासः क्वचिच्चेति चिकित्सा नास्ति निष्फला॥ आयुर्वेदोदितां युक्तिं कुर्वा
णा विहितास्त्वये॥ प्रणष्टायुर्वृद्धिसंयुक्ता नीरोगाश्च भवंति ते॥ नैव कुर्वीत लोभेन चि
कित्सा पुण्यविक्रियां॥ ईश्वराणां वसुमतां लिप्सेतार्थं तु वृत्तये॥ चिकित्सितं शरीरं यो
न निष्क्रीणाति दुर्मतिः॥ स यत्करोति सुकृतं सर्वं तद्भिषगश्नुते॥ न देशो मनुजैः शून्यो
न मनुष्या निरामयाः॥ ततः सर्वत्र वैद्यानां सुसिद्धा एव वृत्तयः॥ अथ चिकित्सायाश्चत्वार्यं
गानि॥ रोगी हतो भिषग्दीर्घमायुर्द्रव्यं सुसेवकः॥ सदोषधं चिकित्सायामित्यंगानि ब
धा जगुः॥ अथ रोगिणो लक्षणमाह॥ रोगो यस्यास्ति रोगी स स चिकित्स्यस्तु या

दृश्य:॥ यादृशांश्चिकित्स्योपि वक्ष्यमाणो निशम्यतां न त्वचिकित्स्य:॥ निजप्रकृतिवर्णाभ्यां
युक्त: सत्वेन वत्तया॥ चिकित्स्यो भिषजा रोगी वैद्यभक्तो जितेंद्रिय:॥ सत्वं व्यसनाभ्युदयक्रि
यादिष्वपि विह्वलकरं तेन युक्त:॥ वदतां वक्तुं रूपलक्षितेनान्येनापींद्रियेण॥ चिकित्स्य:
रोगान्मोचयितव्य:॥ अन्यच्च॥ आयुष्मान्सत्ववान्साध्यो द्रव्यवान्मित्रवानपि॥ चिकित्स्यो
भिषजा रोगी वैद्यवाक्यकृतास्तिक:॥ आयुर्वेदोऽस्तीति मतिर्यस्य स आस्तिक:॥ अथा
चिकित्स्य:॥ चंड: साहसिको भीरु: कृतघ्नो व्यग्र एव च॥ शोकाकुलो मुमूर्षुश्च विहीन:
करणैस्त्रय:॥ वैरी वैद्यविदग्धश्च श्रद्धाहीनश्च शंकित:॥ भिषजामविधेयाश्च नोप
क्रम्या भिषग्विधा: एतानुपाचरन्वैद्यो बहून्दोषानवाप्नुयात्॥ चंडोऽत्यंतक्रोधशील:
साहसिक: अविचार्यकारी॥ भीरुर्भयशील: कृतघ्नो वैद्यकृतोपकारलोपक: व्यग्रो
व्याकुलचित्त:॥ हीन: करणैस्त्रय: नेत्रादींद्रियप्राप्तिरहित: वैरी न चिकित्स्य: कदाचि

द्रोगोद्रेकेपवादभयात वैद्यविद्वेषो वैद्ये हितः॥ तथा च सुश्रुतः॥ स न सिध्यति वैद्यस्तु
गृहे यस्य न पूज्यते शंकितो वैद्यविश्वासरहितः॥ भिषजामभिधेयाः वैद्यवचनाभिधा
यिनः भिषग्विधाः वैद्यतुल्याः एते नोपक्रम्याः न चिकित्स्याः॥ अथ दूतलक्षणम् यश्चिकित्स्यक
मानेतु याति दूतः स उच्यते॥ स च यादृक् समुचितस्तादृग्गच्छन्निगद्यते दूताः सजातयोः
वेगाः पटवो निर्मलांवराः॥ सर्षि न स्त्रक्वसारूढाः शुभ्रपुष्पफलैर्युताः सजातयः सवे
ष्टाश्च सजीवदिग्विसंगताः भिषजं समये प्राप्ता रोगिणः सुखहेतवे॥ सजातयः रोगिस
मानजातयः यस्यां प्राणमरुद्वाति सा नाडी जीवसंज्ञिता॥ अथ दूतस्य यात्राशकुनवि
चारः॥ वैद्याह्वानाय दूतस्य गच्छतो रोगिणः कृते न शुभं सोम्यशाकुनं प्रदीप्तं च सुखा
वहं॥ प्रदीप्तमग्निः दूतो रोगी च रिक्तहस्तो वैद्यं न पश्येत्॥ तथा च॥ रिक्तहस्तो न पश्येत्तु
राजानं भिषजं गुरुमिति॥ अथ वैद्यस्य लक्षणं॥ चिकित्सां कुरुते यस्तु स चिकित्सक उ

च्यते॥ स च यादृक् समीचीनस्तादृशोपि निगद्यते॥ तत्त्वाधिगतशास्त्रार्थो दृष्टकर्मा स्वयंकृ
ती॥ लघुहस्तः शुचिः शूरः सज्जोपस्करभेषजः॥ प्रत्युत्पन्नमतिर्धीमान्व्यवसायी प्रियंव
दः॥ सत्यधर्मपरो यश्च स एव वैद्यः प्रशस्यते॥ दृष्टकर्मा दृष्टा परेण कृता चिकित्सा येन सः
स्वयंकृती स्वयं चिकित्साकुशलः लघुहस्तः सिद्धिमद्धस्तः अथ निषिद्धो वैद्यः॥ कुचैलः
कर्कशः स्तब्धो ग्रामीणः स्वयमागतः पंचवैद्या न पूज्यंते धन्वंतरिसमा अपि॥ कर्कशः
अप्रियवादी॥ स्तब्धः साभिमानः ग्रामीणः न व्यवहारचतुरः॥ अथ वैद्यस्य कर्माह॥
व्याधेस्तत्त्वपरिज्ञानं वेदनायाश्च निग्रहः॥ एतद्वैद्यस्य वैद्यत्वं न वैद्यः प्रभुरायुषः॥ अ
स्यायमर्थः॥ व्याधेः सम्यक्परिचयो व्यथाशांतिकरणं वैद्यस्य कर्म। न तु वैद्य आयुषः
प्रभुरित्यर्थः अपरे त्वेवं व्याचक्षते॥ व्याधेस्तत्त्वतः परिचयो वेदनायाः शांतिकरणं च
एतदेव वैद्यस्य वैद्यत्वम्॥ किंतु वैद्य आयुषः प्रभुः आगंतुकमृत्युशतहरणात् न
न

याचसश्रुतेधन्वंतरिः॥ एकोत्तरं मृत्युशतमथर्वाणः प्रवदंति॥ तत्रैकः कालसंयुतः
शेषास्त्वागंतवः स्मृताः॥ अथमर्थः॥ अथर्वाणः अथर्ववेतत्वत्वेन अथर्ववेत्तारः मृत्यु
मेकोत्तरं शतं प्रवदंते॥ तत्रैको मृत्युः कालसंयुतः॥ कालः आयुषोंऽते शरीरेणम
वश्यं संहर्ता॥ सर्वैरुपायैर्निवारयितुमशक्यः॥ स ब्रह्मादीनायुषोंऽते संहरति यतऽऽ
ह लिंगपुराणे कार्त्तिकेयं प्रति महादेवः॥ मम आयुर्ग्रसते कालः कृतः पुत्र रसायन
मिति॥ तेन कालेन संयुक्तः संहाराय नियुक्तः सोऽवश्यंभावः शेषाः शतं मृत्यवः
आगंतवः आगंतुहेतुरूपजन्मानः कार्यकारणयोरभेदोपचारात्॥ आगंतवो हेत
वो यथा॥ विषभक्षणमजीर्णेऽत्यंतमधिकभोजनं बहुदुष्टजलपानं तथातिबलवैरि
व्याघ्रवन्यमहिषमातंगादिभिर्युद्धं दंदशूकेन क्रीडनं मत्तवृषभारोहणं बाहुभ्यांम
हातरंगिणीतरणमेकाकिनो रात्रौ दुर्गे गमनमित्यादि॥ आगंतुहेतुनामृत्यवो दुर्नि

मित्रभाविभावानां बलवत्वाद्दाशु विसत्यपि मारयंति॥ यथा मल्लिका तैलवर्तिवह्निषु
वात्यादीपं नाशयंति॥ तथा च॥ यथा सत्यपि तैलादौ दीपं निर्वापयेन्मरुत्॥ एवमा
युष्यहीनेपि हिंसंत्यागंतुमृत्यवः किं तु॥ आगंतुनिमित्तानि च निवारयितुं शक्यंते॥ य
त॥ आह स्म सुतेधन्वंतरिः॥ दोषागंतुनिमित्तेभ्यो रसमंत्रविशारदौ॥ रक्षेतां नृपतिं
यत्नान्नित्यं वैद्यपुरोहितौ॥ वैद्यमंत्रिणौ नृपतिं नित्यं यत्नाद्रक्षेतां॥ कुतः दोषागंतु
निमित्तेभ्यः। दोषाः निषिद्धाहारविहारदूषिता वातपित्तकफा रोगोत्पादकाः आगंतु
वः निषिद्धविहाराः प्रतिबलवैरिविग्रहादयः ते निमित्तानि येषां तेभ्यः शतमृत्युः
न्नु वैद्यपुरोहितौ कथं शतमृत्यून् निवारयितुं शक्तौ॥ तत्राह॥ यत्तस्तौ रसमंत्रविशा
रदौ॥ प्रथमे वैद्येन दिनचर्या रात्रिचर्या ऋतुचर्योक्ताहारविहाराभ्यां वातपित्तकफधातुम
त्वान्समानेव रक्षति॥ ततो रसज्ञत्वाद्रसैर्भस्मं तु जयादिभिर्निषिद्धाहारविहारदूषितदो

यजनितान्विकारान्मृत्युहेतून्परिहरति॥ मैत्री च सद्बुद्धिदानेन मृत्युहेतुभ्यो निषिद्धविहा
रेभ्यो नप्रवृत्तिं निवारयति॥ ततश्चागंतुमृत्यवो निवारयितुं शक्या न त्ववश्यंभाविनः॥ अ
थायुर्विचारः। भिषगादौ विपरीक्षेत रुग्णस्यायुः प्रयत्नतः॥ अतश्चायुषि विस्तीर्णे चि
कित्सा सफला भवेत्॥ तत्र दीर्घायुषो लक्षणानि॥ सौम्या दृष्टिर्भवेद्यस्य श्रोत्रं वक्त्रं तथैव
व च॥ स्वादुगंधं विजानाति स साध्यो नात्र संशयः॥ पाणिपादौ च यस्योष्णौ दाहः स्वल्प
तरो भवेत्॥ जिह्वा तु कोमला यस्य स रोगी न विनश्यति॥ स्वेदहीनो ज्वरो यस्य श्वासो ना
सिकया चरेत्॥ कंठश्च कफहीनः स्यात्स रोगी जीवति ध्रुवं॥ यस्य निद्रा सुखेन स्याच्छ
रीरं द्युतिमद्भवेत्॥ इंद्रियाणि प्रसन्नानि स रोगी नैव नश्यति॥ अथ मृत्युलक्ष
णानि॥ शरीरशीलयोर्यस्य प्रकृतेर्विकृतिर्भवेत्॥ तदरिष्टं समासेन व्यासतश्च निबो
धमे॥ शृणोति विविधान्शब्दान्विपरीतं शृणोति वा॥ यो न शृणोति वा कस्मा

नंवदंतिगतायुषं॥यस्तूष्ममिवगृह्णातिशीतमुष्मंचशीतवत्॥उष्मगात्रोऽतिमा
त्रेयोऽत्यर्थंशीतेनकंपते॥तमपिगतायुषंवदंतीत्यन्वयः॥प्रहारंनैवजानातियोग
च्छेदन्यथापिवा॥पांसुनेवाविकीर्णानियश्चगात्राणिमन्यते॥वर्णान्यतावाराज्योवा
यस्यगात्रेभवंतिहि॥स्नातानुलिप्तंपंचापिभजंतेनीलमक्षिकाः॥विपरीतेनगृह्णातिरसा
न्यश्चोपयोजितान्॥योवारसान्नसेवेततंगतासुंप्रचक्षते॥सुगंधंवेत्तिदुर्गंधंदुर्ग
धंचसुगंधवत्॥गृह्णातियोऽन्यथागंधंशांतेदीपेनिरामयः॥रात्रौसूर्यंज्वलंतंवादिवा
वाचंद्रवर्चसं॥दिवाज्योतींषियश्चापिज्वलितानीवपश्यति॥दिवाचंद्रवर्चसंसूर्य
मित्यन्वयः॥ज्योतींषिनक्षत्राणिविद्युत्वतोऽसितान्मेघान्गगनेनिर्घनेघनान्॥वि
मानयानप्रासादैर्यश्चसंकुलमंबरं॥यश्चानिलंमूर्तिमंतरिक्षेऽवलोकते॥धूमनीहा
रवासोभिरावृतामिवमेदिनीं॥प्रदीप्तमिवयोलोकंयोवाक्लिन्नमिवांभसा॥भूमिमष्टाप
दाकारंलेखाभिर्यश्चपश्यति॥योनपश्यतियत्नाणियश्चदेवीमरुंधतीं॥ध्रुवमाका
शगंगांचतंवदंतिगतायुषम्॥आदर्शेऽम्बुनिवर्मेवाछायांयश्चनपश्यति॥पश्यपकोग
ते

स्प

मंत

हीनां वा विकृतां वान्यसत्वजां ॥ अथ काकगृध्रकंकानां प्रेतानां यक्षरक्षसां ॥ आतुरो लभते स्वं
स्वस्थो व्याधिमवाप्नुयात् ॥ ह्रीः श्रियो न श्यते यस्य तेज ओजः स्मृतिः प्रभा ॥ अकस्माद्भजते वा यः
सपरास्तु रसेशयं प्रभाऽच प्रतिमा ॥ यस्याधरोष्ठः पतितः क्षिप्तश्चोर्ध्वं तथोत्तरः ॥ उभौ वा
जांबवाभासौ दुर्लभं तस्य जीवितं ॥ आरक्ता दशना यस्य श्यावा वा स्युः पतंति वा ॥ खंजनप्रतिमा
वापि तं गतायुषमादिशेत् ॥ कृष्णा तथावलिप्ता च जिह्वा शूना वा यस्य वै ॥ कर्कशा वा भवे यस्य
सोऽचिराद्द्विजहात्यसून् ॥ कुटिला स्फुटिता वापि शुष्का वा यस्य नासिका ॥ अवस्फूर्जति मग्ना
वा स न जीवति मानवः ॥ अवस्फूर्जिते श्वासवेगेनोच्चैः शब्दं करोतीत्यर्थः ॥ संक्षिप्ते विषमे
स्तब्धे रक्ते सास्रे च लोचने ॥ स्यातां यदि स्रुते यस्य स गतायुर्नरो ध्रुवं ॥ केशाः सीमंतिनो यस्य
संक्षिप्ते विनते भ्रुवो ॥ लुलंति चाक्षिपक्ष्माणि सोऽचिरात् याति मृत्यवे ॥ खलंति पतंति ना
हरत्यन्नमास्यस्थं न धारयति यः शिरः ॥ एकाग्रदृष्टिर्मूढात्मा सद्यः प्राणान्विमुंचति ॥
उत्थाप्यमानो बहुशः संमोहं योऽधिगच्छति ॥ बलवान्दुर्बलो वापि तं पक्वं भिषगादिशे
त् ॥ निद्रानिरंतरं यस्य यो जागर्ति च सर्वदा ॥ मुह्येद्वा वक्तुकामश्च प्रत्याख्येयः स जानता

उत्तरोष्ठं चयो लिह्यात्कुर्कराश्च करोति यः॥ प्रेतैर्वा भाषते सार्धं प्रेतरूपं तमादिशेत्॥ उत्का
रान्कुत्सपादादीन्निंदितिपेत्॥ स्विभ्यश्च रोमकूपेभ्यो यस्य रक्तं प्रवर्तते॥ पुरुषस्य विघातेस्य स
सद्यो जीवितं त्यजेत्॥ सम्यक्चिकित्स्यमानस्य विकारो योभिवर्द्धते॥ प्रक्षीणबलमांसस्य ल
क्षणं तद्गतायुषः॥ भूताः प्रेताः पिशाचाश्च रक्षांसि विविधानि च॥ मरणाभिमुखं जन्तुमुपस
र्पगतायुषः॥ तान्निभेषजवीर्याणि प्रतीच्छंति जिघांसया॥ तस्मान्मोघाः क्रियाः सर्वा भवंत्ये
कि वनहेतुः॥ चिकित्साविधानेन॥ भिषजेन पुनर्जीवेत्तस्मात्तु निरामयः॥ तत्रोच्यते॥ आयु
षि सति चिकित्सायाः फलं वेदना निग्रहः॥ उक्तं च॥ आयुष्मान्पुरुषो जीवेत्सत्ययोभिषजे
हि विना॥ भिषजेन पुनर्जीवेत्स एव निरामयः॥ किंच॥ आयुषि सत्यपि रोगी चिकित्सां विनो
त्थातुं शक्नोति॥ यत आह चरकः॥ सति आयुषि नोपाये विनोत्थातुं क्षमो रुजा॥ दर्शितश्चा
त्र दृष्टांतः पंकलग्नो महागजः॥ किंच॥ चिकित्सां विनायुष्मानप्यवसीदति॥ यत आह सरा
व॥ सति आयुषि नष्टः स्याद्दामयैश्चाचिकित्सितः॥ यथा सत्यपि तैलादौ दीपो निर्वाति वा

कः=

98

८९

त्यया॥ अत्र तत्रैवोक्तं॥ साध्या याप्यत्वमायांति याप्या गच्छंत्यसाध्यतां॥ घ्नंति प्राणानसा
ध्यास्तु नराणामक्रियावतामिति॥ चिकित्सात्वनिश्चितात्वेषोपि कर्तव्या यत आह॥ ना
वश्यंतिक्रियाकार्या यावच्छ्वसिति मानवः॥ कदाचिद्दैवयोगेन दृष्टारिष्टोपि जीवति इ
ति तु यस्यासाध्यत्वं संदिग्धं तमप्युक्तं॥ येषु त्वसाध्यता शास्त्रेण नु भवेन विनिश्चिता
ते न पुनर्न चिकित्स्याः। यत उक्तं॥ सहैघास्ते न ये साध्या नारभेतैश्चिकित्सितुमिति॥ अ
थ द्रव्यं॥ सर्वं द्रव्यमथैतत्ते रोगिभ्यस्तयोयतः॥ विनावित्तं च भैषज्यं चिकित्सांगं ततो धनं
॥ अथ परिचारकस्य लक्षणं॥ स्निग्धोजुगुप्सुर्बलवान्युक्तो व्याधितलक्षणे॥ वैद्यवाक्यकृद
श्रांतो भज्यते परिचारिकः॥ स्निग्धः शीतः अजुगुप्सुः अनिद्रकः॥ अथ भेषजस्य लक्षणं
वैद्यो व्याधिं हरेद्येन तद्द्रव्यं भेषजमौषधं॥ तच्चाहुः शमवच्चैव स्याद्रोगघ्नं तादृशं बुधे॥ तत्रौ
षधग्रहणपरिभाषा॥ प्रशस्तदेशे संजातं प्रशस्तेहनि चोद्धृतं॥ अल्पमात्रं बहुगुणं॥
गंधवर्णरसान्वितं॥ दोषघ्नमग्लानिकरमविकारि विपर्यये॥ समीक्ष्यकाले दत्तं च भे
षजं स्याद्गुणावहं॥ आग्नेयाविंध्यशैलाद्याः सौम्यो हिमगिरिः स्मृतः॥ अतस्तदोषधानि

स्पुरनुरूपाणि हेतुभिः॥ आग्नेया अधिकाग्न्यंशाः सौम्या अधिकसोमांशाः औषधयएव
औषधानि॥ अत्रस्वार्थे अण्॥ अनुरूपाणि सदृशानि अन्येष्वपि प्ररोहंति वनेषु च गृ
ह्णीयात्तानि सुमनाः शुचिः प्रातः सुवासरे॥ आदित्यसंमुखो मौनी नमस्कृत्य शिवं हृदि॥
साधारणधराद्रव्यं गृह्णीयादुत्तराश्रितं॥ साधारणधराद्रव्यं सर्वभूमिभवं द्रव्यं उत्त
राश्रितं उत्तरदिग्भवं॥ वल्मीककुत्सितानूपश्मशानोषरमार्गजाः जंतुवह्निहिमव्या
प्ता नौषध्यः कार्यसाधकाः॥ शरद्यखिलकार्यार्थं ग्राह्यं सरसमौषधं॥ विरेकवमना
र्थं तु वसंतांते समाहरेत्॥ वसंतांते वसंतमध्ये समाहरेत् संगृह्णीयात्॥ अतिस्थूलजटा
याः सुस्तासां ग्राह्यास्त्वचो ध्रुवम्॥ गृह्णीयात्सूक्ष्ममूलानि सकलान्यपि बुद्धिमान्॥ अ
न्यच्च॥ येषां महांति मूलानि काष्ठगर्भाणि हरतः तेषां तु वल्कलं ग्राह्यं ह्रस्वमूलानि
सर्वशः॥ न्यग्रोधादेस्त्वचो ग्राह्याः साराः स्याद्बीजकादितः॥ तालीसादेश्च पत्राणि फ
लं स्यात्त्रिफलादितः॥ क्वचिन्मूलं क्वचित्कंदः क्वचित्पत्रं क्वचित्फलं॥ क्वचित्पुष्पं क्वचित्स
र्वं क्वचित्सारः क्वचित्त्वचः चित्रकं स्वरणं निंबो वासाचात्रिफलाक्रमात्॥ धातकीकंटका

कूपवने

रीचर्षोदिरःक्षीरपादपः॥ क्वचिन्निंबस्य गृह्णीयात्तत्राभावे त्वचामपि॥ बालंफलं तु बिल्व
स्य पक्वमारग्वधस्य च॥ अंगेषु तेजटाग्राह्या भागे तु तेऽखिलं समं॥ पात्रेऽनुक्ते मृदः पात्रं का
लेऽनुक्ते त्वहर्मुखं॥ न वान्ये वह्नियोज्यानि द्रव्याण्यखिलकर्मसु॥ विनाविडंगकृष्णाभ्यां
गुड धान्याज्यमाक्षिकैः॥ धान्यमन्नपरं॥ पुराणं तु प्रशस्तं स्यात्तांबूलं कांजिकं तथा॥ मुख्यं न
वीनं द्रव्यं तु योज्यं सकलकर्मसु॥ आर्द्रं तु द्विगुणं युंज्यादेष सर्वत्र निश्चयः॥ गुडूचीकुटजो
वासा कूष्मांडश्च शतावरी॥ अश्वगंधा सहचरः शतपुष्पा प्रसारिणी॥ प्रयोक्तव्याः सदैवार्द्रा
द्विगुणं नैव कारयेत्॥ सहचरः कुरंटकः कटसरैया इति लोके॥ वासा निंब पटोलकेत
कवला कूष्मांडकेंदीवरीवर्षाभूकुटजाश्वकंदसहिता सा पूतिगंधा तथा मांसी नागबला
कुरंटकपुरो हिंगूार्द्रकं चेन्नवं गृह्णीयात्सरसान्यमूनि न पुनः कुर्यांद्विभागानि च॥ सर्वदा
सार्द्राण्येव न तु क्वचित् द्विगुणिताः कार्याः प्रयोज्या बुधैः॥ ऐंद्री इंद्रवारुणी॥ वरी शतावरी पूति
गंधा गंधप्रसारिणी॥ नागबला गुलसकरी कुरंटकः पीतपुष्प कटसरैया॥ पुरीगुग्गु
लुः॥ [illegible]॥ घृतं तैलं च पानीयं कषायं व्यंजनादिकं॥ पक्वाशीतं पुनश्चोष्ण
[illegible]

101

नत्सर्वे स्याद्विषोपमं॥ अथ द्रव्याणां परीक्षा॥ सूक्ष्मा स्थिर्मा सलापथ्या सर्वकर्मणि पूजिता
तिन्ता भसि निमज्जेद्या भल्लातकप्रभयोत्तमा वाराहम्बृष्ठ वर्त्के दो वाराही कंद संज्ञकः॥ सोव
र्चलं तु काचाभं सैंधवं स्फटिक प्रभं॥ सुवर्णा छविकं ज्ञेयं स्वर्णमाक्षिकमुत्तमं॥ उदपुष्पप्र
तीकाशं मनोह्वा चोत्तमा मता॥ श्रेष्टं शिलाजतु ज्ञेयं प्रक्षिप्तं न विशीर्यते॥ तोयपूर्णे कां
स्यपात्रे प्रतापेन विवर्द्धते॥ कर्पूरस्तु वरः स्निग्धः एलास्सूक्ष्मफला वरा॥ श्वेतं चंदनम
त्यंतं सुगंधि गुरु पूजितं॥ रक्तचंदनमत्यंतं लोहितं प्रवरं मतं॥ काकतुंडनिभः स्निग्धो
गुरुश्श्रेष्ठो गरुर्मतः॥ सुगंधि लघु रूक्षं च सुरदारु वरं मतं॥ सरलं स्निग्धमत्यर्थं सुगंधि
चगुणावहं॥ प्रतिपीता प्रशस्ता तु ज्ञेया दारु निशा बुधैः॥ जातीफलं गुरु स्निग्धं समं
सुभ्रांतरं वरम्॥ मृद्वीका सोत्तमा ज्ञेया या स्याद्गोस्तनसंनिभा॥ करमर्दफलाकारा मध्य
मा सा प्रकीर्तिता॥ गोस्तनसंनिभाः मुनक्का इति लोके॥ करमर्दफलाकारा कशोदी दा
ख इति लोके॥ खंडं तु विमलं श्रेष्ठं चंद्रकांतसमप्रभं॥ गव्या सद्यः प्रसूता गंधं मधु
वरं मतं॥ अथ यस्त्वभावतो हितानि॥ शालीनां लोहितः शालिः षष्टिके षु च षष्टिका॥

ज्वर

६६

शूकधान्येष्वपि यवो गोधूमः प्रवरो मतः॥ शिंबिधान्ये वरो मुद्गो मसूराश्चाढकी तथा
रसेषु मधुरः श्रेष्ठो लवणेषु च सैंधवः॥ दाडिमामलकं द्राक्षा खर्जूरं च परूषकं॥
राजादनं मातुलुंगं फलवर्गे प्रशस्यते॥ परूषकं फरसा राजादनं खिरणी इति लोके॥
मातुलुंगं विजोरा इति लोके॥ पत्रशाकेषु वास्तूकं जीवंती पोतिका वरा॥ पटोलं फुलशाके
षु कंदशाकेषु सूरणं॥ एणः कुरंगो हरिणो जांगलेषु प्रशस्यते॥ पक्षिणां तित्तिरो लावो
वरो मत्स्येषु रोहिषः॥ हरिणस्ताम्रवर्णः स्यादेणः कृष्णस्तथा मतः॥ कुरंगस्ताम्रकृष्णः स्या
द्धरिणः पूजितो महान्॥ जलेषु दिव्यं दुग्धेषु गव्यमाज्येषु गोभवं॥ तैलेषु तिलजं तै
लमेतद्वेषु च हिताहितं॥ अथ स्वभावादहितानि॥ समीषु माषान्ग्रीष्मे तौ लवणेषूष
रं त्यजेत्॥ फलेषु लकुचं शाके सार्षपं नाहितं मतं॥ गोमांसं ग्राम्यमांसेषु नाहितं महिषी
वसा॥ मेषी पयः कुसुंभस्य तैलं त्याज्यं च फाणितं॥ इक्षुरसः परिपक्वो योऽर्धघनरस
स्तत् फाणितं तद्धि॥ छोआ इति वदति लोके॥ अथ संयोग... विरुद्धानि॥ मत्स्यमानूप
मांसं च दुग्धयुक्तं विवर्जयेत्॥ कापोतं सर्षपस्नेहभर्जितं परिवर्जितं॥ मत्स्यानितो विं

रि

पा॰मा॰
१०३

कुर्यादिति यमोपि गायत्र्यास्तु परं जप्यं गायत्र्यास्तु परं तपः गायत्र्यास्तु परं ध्यानं गायत्र्यास्तु
परं कृतमिति मनुरपि योधीतेहन्यहन्येतां त्रीणि वर्षाण्यतंद्रितः स ब्रह्म परमभ्येति
वायुभूतः खमूर्तिमानिति गोभिलोपि अनेन विधिना नित्यं जपं कुर्यात्प्रयत्नतः
प्रयतो विपुलान्भोगान्भुक्त्वा भुक्तिं च विंदतीति इति संध्याजपयोः प्रकरणम्
अथ होमविधिः तत्र कूर्मपुराणे अथागत्य गृहे विप्रः समाचम्य यथाविधि
प्रज्वाल्य वह्निं विधिवज्जुहुयाज्जातवेदसमिति दक्षोपि संध्याकर्मावसाने तु
स्वयं होमो विधीयते स्वयं होमे फलं यत्स्यात्तदन्येन न लभ्यते होमे यत्फलमु
द्दिष्टं जुहुतः स्वयमेव तु हूयमानं तदन्येन फलमर्द्धं प्रपद्यते ऋत्विक्पुत्रो गुरु
र्भ्राता भागिनेयोथ विट्पतिः एतैरपि हुतं यस्मात्तद्धुतं स्वयमेव तु विट्पतिर्जामा
ता स्वयं होमसंभवः तदभावे ऋत्विगादिहोमः तत्र विशेषः कूर्मपुराणे दर्शि
तः ऋत्विक्पुत्रोथवा पत्नी शिष्यो वापि सहोदरः प्राप्यानुज्ञां विशेषेण जुहुयाद्वा य

राम
१०३

103

हस्रकं स्फटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दशलक्षं तु सौवर्णैः
कोटिरुच्यते कुशग्रंथ्या च रुद्राक्षैरनन्तफलमुच्यत इति अथाक्षमालाम
णिसंख्यामाह प्रजापतिः अष्टोत्तरशतां कुर्याच्चतुःपंचाशिकां तथा सप्तविं
शतिकां कार्या ततो नैवाधिका हिता अष्टोत्तरशतामाला उत्तमा सा प्रकीर्ति
ता चतुःपंचाशिका कार्या मध्यमा सा प्रकीर्तिता अधमा प्रोच्यते नित्यं सप्तविंश
तिसंख्ययेति गौतमोपि अंगुष्ठं मोक्षदं विद्यात्तर्जनी शत्रुघातिनी मध्यमा धन
कामार्थी नामिका पौष्टिकी तथा कनिष्ठा रक्षिणी प्रोक्ता जपकर्मणि शोभना
अंगुष्ठेन विना जप्यं कृतं न सफलं भवेदिति गायत्रीजपं प्रशंसति व्यासः दश
कृत्वः प्रजप्ता सा अहोरात्रकृतं लघु तत्पापं प्रणुदत्याशु नात्र कार्या विचारणा श
तजप्ता तु सा देवी पापौघशमिनी स्मृता सहस्रजप्ता सा देवी उपपातकनाशिनी
लक्षजाप्येन च तथा महापातकनाशिनी कोटिजाप्येन सो लोके यदिच्छति तद